प-११४ १

॥ द्रव्यकिरणावलीप्रकाश ॥

भं॰व॰ १

॥ ॥श्रीगणेशायनमः॥ ॥गंडाभोगविलोलषट्पदघटासंचारणाद्याश्रितःशुंडादंडविघट्टनेनपरितोविघ्नाद्रिनिघ्नन्निवानिर्गच्छन्मद
वारिपिच्छिलतरेमार्गेमुहुःप्रस्खलन्नारब्धेममसज्जायतामिहकरालंबायलंबोदरः॥१॥जयदेवगुरोःसम्यग्धीत्यमतमुन्नमां।इ
द्युप्रकाशविद्दौशाचिद्रन्नःप्रवर्त्तते॥२॥मिलदिति।विश्वरूपवीजंमहादेवस्तदंकुरसमामित्यर्थः।अत्रान्यदपिवीजंमघादिजल
संबंधेनांकुरंजनीतिध्वनिः।मणिकारमतेनाह।कार्येति।ननुरविनमस्कारमित्ययुक्तं।रवेरनात्मत्वेषादितिस्वोक्तमुपपादयति
।यदिति।विद्याविद्ययोरिति।नत्वविद्येवयासंध्येतिव्याख्यानासंध्याराजन्योरेवरूप्यत्वंनत्वविद्याविद्ययोरितिचेत्।अत्रविद्या
विद्ययोरित्यत्रविभक्तिविपरिणामस्तेनसंध्याराजन्योर्विद्याविद्याभ्यांरूपणमित्यर्थपर्यवसानमित्येके।रूप्यतेनेनेतिव्युत्पत्त्या
रूपणंरूप्यरूपकभावसंबंधस्तथाचविद्याविद्ययोःसंध्याराजनीभ्यामिहरूप्यरूपकभावसंबंधाद्इत्यर्थइत्यन्ये।केचित्तु
रूपणादितिपाठस्तत्रनिरूप्यतेनेनेतिव्युत्पत्त्यानिरूपणंशब्दउपमानमाह।तथाचभानप्रकाशमनिर्देशादुपमानत्वमित्यर्थो
बोध्यः।विद्येवेतिमध्यमपदलोपीसमासः।योग्यताबलात्सामान्यशब्दोविशेषपरइत्याहपूर्वेति।ननुरव्येकदेशःसंध्यातथाच राम॰
तस्यावैरूजनीक्षयइत्यतआहसंध्याचेति।निरस्तेति।नत्वनिरासोनप्रागभावःप्रध्वंसोवा।अतीतानागतयोस्तदभावात्।नाद्यं १

न१ ज२

म०व० रात्रित्वं लाघवात् ॥ नत्वत इत्थमिगर्भमितिशमिसंध्यापि रात्रिरेव । संध्यारात्र्योरित्यादौ धर्मशास्त्रे पृथगुपादानं गोबलीवर्दन्यायेन ।
२ तत्र प्रयोजनांतरं वदिहापिदोषातिशयादिप्रयोजनप्रदर्शनार्थमित्यभिप्रायः सारार्हयइति । लक्षोपइति । नच कर्मयोगं विनानसं
भमीतिवाच्यं । उदेतीत्यस्योदयगिरिशिखरमारोहतीत्यर्थप्रदर्शनाडुपसर्गार्थस्यैव कर्मत्वादितिभावः ॥ नत्वल्पवर्थे पंचम्यानश
क्तिर्मानाभावात् ॥ नलक्षणाया इतिभक्तौ जहल्लक्षणायाश्च स्तुत्यन्तेरितिचेत्सन् । कर्मणि पंचमीतिसूत्रस्वरसात् कर्मत्वमात्रे हि पंचमी ।
नचल्पवर्थ्यलाभः । ल्यब्लोपएवपंचमीविधानेन त्वल्पवर्थं तस्यैव तद्बोधकत्वात् ॥ सेवेति । पद्यथ्यात्मसाक्षात्कारस्तत्प्रकाश्यो
नत्वत्तत्प्रकाशकस्तथापुनरप्रकाशयत्वं किंपाति पूर्वप्रकाशयत्के हेतुत्वान्नोक्तदोष इत्याहुः ॥ तत्त्वप्रकाशकत्वं तत्त्वविषयक
त्वं विषय. ता च क्वचित्प्रतिपत्त्यनुबंधितया क्वचिद्व्यापाराननुबंधितयेत्यन्ये । मिथ्याज्ञानमिति । तज्जन्यवासनेत्यर्थः ॥ नपुंसकत्वा
नुपपत्तेराह । आत्मस्वरूपमिति । साक्षात्कारायचेति । साक्षात्क्रियतेनेनेतिव्युत्पत्त्या साक्षात्कारहेतुर्ब्रह्मांतर्वर्ती आलोकः ॥ तेन रा०
तद्यर्थमितिसूर्यपक्षेनविरुद्धमित्याहुः ॥ आत्मभेदेति । आत्मनिष्ठभेदेत्यर्थः ॥ मोहेति । यद्यपि तत्त्वज्ञानेन मिथ्याज्ञानं निवर्तते २

तदा कामरूपादौ रविरश्मिसत्त्वात्। तत्र ज्योतिःशास्त्र स्पष्टमाणत्वात्। तथा चैतद्द्वीपपदं तत्तद्देशपरं। न चाननुगमः। ४॥

तादृग्भावस्य दिनेतिव्याप्तेः। एतद्द्वीपवर्त्तिरविरश्मिजन्यद्वीपान्तरेतदाप्यत्यन्ताभावसत्त्वात्। अत एव न संसर्गाभावोऽन्योन्याभावो वे
ति चेत्। न। सावधिसंसर्गाभावस्य विवक्षितत्वादित्येके। रविरश्मीनामुत्पन्नत्वे न विशेषणाद्ध्वंसस्यैव विवक्षितत्वादित्यन्ये। द्वीपश्च
त्र भारतवर्षादिः। तेन जंबूद्वीपान्तर्गतमेरोरुत्तरभागे रात्रावपि रविरश्मिसत्त्वेप्यतिव्याप्तिर्नेत्याहुः। केचित्तु द्वीपपदं न भारतवर्षपरं। उ
क्तं देशे एकदंडरात्रौ रविदंडद्वयेवाव्याप्तेः। किंतु देशोकः कालविशेषो रात्रिरित्यननुगतस्यैव लक्ष्यत्वादननुगमो न दोषः इति व
दंति। न च रात्रौ वह्निगतरविरश्मिसत्त्वादसंभव इति वाच्यं। तदा तस्य रविरश्मित्वाभावात्। तस्य तदविनाशित्वात्तदारंभकपरमा
णुभिरन्यतेजसामारंभात्। अन्याप्रविष्टेति विशेषणात्। प्रकाशकत्वे न विशेषणात् नसोत्र सरेणसत्त्वे संप्यसंभवः। यदि सकल
पदमप्यस्ति तदा तत्सूचनायैव जालपदं। प्रलयेतिव्याप्तिवारणाय विशेषपदं कार्यद्रव्याधारपरं। यद्वा यावद्रविरश्मिजालसंस
र्गाभावावच्छिन्नैतद्द्वीपावच्छिन्नत्वं विवक्षितं। तेन प्रलयेन प्रसंगः। तदा द्वीपाभावेन विशेषणाभावात्। न विशिष्टाभावसत्त्वात्।
न चैवं विशेषपदं व्यर्थं। कालस्य नित्यद्रव्यस्य धारणीयत्वात्। उपाधेरेव रात्रित्वात्। ननु निरस्तैतद्द्वीपवर्त्तिरवित्वमेव कालस्य

इति । मिथ्याज्ञाननिवृत्तेर्न प्रमाणतत्त्वज्ञानं प्रति प्रयोजकत्वं तथापि व्यक्तिविशेषे तथात्वसंभव इति भावः । किरणपरंपरां चेति । अत्र
तेजःपदेन प्रभायाः किरणावयवस्य वा विवक्षणमतो न तेजःकिरणयोरैक्येनान्वय इति भावः । ननु कर्त्रे परोक्षे कथं लिङि
त्याशंकायां कस्यचित्समाधानमाशंक्य निराकरोति । ख्यातत्वाच्चेति । वस्तुत इति । अत्र ज्ञापकमिदं चित्तविक्षेपादिलिङ्परत्वे
नान्यथा सिद्धं । अत एव बहु जगद किलाहमित्यादौ चित्तविक्षेप एव तथा प्रयोग इति चिंत्यं । ननु तंत्र मतं त्रासिति व्याहतमतोऽप्रा
शस्त्येनानिति दर्शयति । असम्यगिति । क्षीणेति । दोषपदं रागद्वेषमोहपरं । तथा च लक्षणत्रयं बोद्धव्यं तथा हि । समानाधिक
रणरागप्रागभावासहवृत्तिरागध्वंसवत्पुरुषत्वं त्रिष्टत्वं । एवं राग पदस्थाने द्वेषादिपदप्रक्षेपेण बोध्यं । पुरुषपदं च कालेतिव्या
प्तिवारणाय । एतेन त्रयपदेनाभावमात्रं विवक्षितं न ध्वंसः पुरुषपदवैयर्थ्यापत्तेरित्यपास्तं । असत्त्वे अशिष्टत्वेऽज्ञानवत्त्वे सती
ति । एतत्कालीनेत्यभावविशेषणं । एतच्च प्रतियोगिसमवायिदेशेपि समयावच्छेदेनात्यंताभाव इति वादिमते बोध्यं । घटादावति
व्याप्तिवारणाय सत्यंतं । यद्यप्येतदपि दृष्टाद्यावतिव्याप्तं तथापि प्रकृष्टज्ञानवत्त्वे सतीत्यर्थसंभवान्निमंदांतः संज्ञाइ ति भावः ।

स्यां २

म०च० जन्मांतरीयतादृशमिथ्याज्ञानात्यंताभावमादायप्रबोधाद्गातिव्याप्तिर्मामूदित्यतउक्तमदृष्टसाधनत्वविषयकेति।यद्यपिशिष्टस्यापिक्वचि
३ ×वारणायैतत्कालीनेति।तथाचयदातदत्यंताभाववत्त्वंतदाशिष्टत्वमित्यर्थः४इदंचतत्तमित्यादिभ्रममादायाव्याप्तिः॥दृष्टसाधने
तत्साधनत्वभ्रमसंभवाद्दोषतादव [illegible] तथाप्यदृष्टंनास्तितत्साधनंनास्तीत्येवंरूपमिथ्याज्ञानात्यंताभाववत्वंवाच्यंध्वंसमादायेवो
द्धातिव्याप्तिवारणायात्यंतेतिपदं।नचमिथ्याज्ञानस्याव्याप्यवृत्तितयातत्सत्वकालेपितदत्यंताभावसत्वादतिव्याप्तिरितिवाच्यं।प्रति
योगिव्यधिकरणात्यंताभावविशेषणत्वात्।निषिद्धेति।यद्यपितदातस्यशिष्टत्वेपिनकाचित्क्षतिःसदाचारेचार्थविशेषणाप्रक्षेपे
णावेदत्वानुमानेनकोपिदोषः४अन्यथासिद्धंतेप्यमीते४तथाप्यसिद्धकालेइतिविशेषणोपादानबलेनविशेषणानिरपेक्षवेदत्व
मापकत्वलाभात्।अन्यथातद्विशेषणप्रक्षेपेकालपदग्रहणानुपपत्तेरेतदुक्तं।तदातस्याशिष्टत्वेप्यवहारमभावादतिव्याप्तिरित्य ३
प्याहुः४जाग्रदादौदृश्यमानोपेत्यादिकमेवशिष्टत्वमुचितं।व्यभिचारवारणोपायस्यानुपदमेवदर्शयिष्यमाणत्वादित्यभिसंधाया
हा।तथापीति।एतच्चलक्षणंप्रत्यक्षप्रकाशेविधंचिंतं।नतुशिष्टाचारस्यवेदत्वाधिकरणत्वात्कथंतद्वत्वानुमापकत्वमित्यतोसमान प्रकार

माह। एवंचेति। अलौकिकेति। न तु शिष्टकृतानिष्फलकर्मता इत्याहौव्यभिचार इ। न च न विकृष्टहाणिकोग्नवैदिकाादिना तस्याविगीतत्वादेवन
तत्र व्यभिचार इति वाच्यं। शिष्टपदवैयर्थ्यापत्तेः। चैत्यवंदनादिव्यभिचारवारणस्याविगीतपदादेव लाभात्। न च लौकिकत्वादेव तस्य
न तत्र व्यभिचार इति वाच्यं। लौकिकत्वं ह्यन्वयव्यतिरेकादिप्रमाणसिद्धत्वं तदनिष्टानुबंधीष्टसाधनताकत्वं। न च तत्र तदस्ति इष्टफल
भावात्। न चाशिष्टपदमिष्टसाधनताभ्रमरहितपरं अतो न तत्र व्यभिचार इति वाच्यं। तदाचारे चेति पूर्वग्रंथविरोधात्। तद्धि हि न पूर्वग्र
कं। तच्छिष्टस्यैव परामर्शात्। प्रमादकृतमद्गुविषसंपृक्तान्नभोजने तथापि व्यभिचारश्चेति चेत्। अत्र वदंति। वेदैर्व्यादिना शिष्टव्यव
हारप्रयोजकं शिष्टत्वमुक्तं। वेदाद्यप्रामाण्यपक्षेहि तौ तूपलक्षणामेतत्। तेन इष्टसाधनतांशे भ्रमरहितत्वस्योपलक्षणात्। तथा चात्र शिष्ट
पदं तत्परमेव। तेन निष्फले कर्मणि न व्यभिचार इ। न चाविगीतपदेनैव तद्वारणमिति वाच्यं। विगीतत्वं हि वेदनिषिद्धत्वं तच्च तत्र न
स्ति सर्वथा तत्र इष्टफलाभावात्। प्रसंगभावेन वैदिकनिषेधासंभवात्। निषेधस्य कथंचित्प्राप्तविषयत्वनियमात्। लौकिकत्वं च
शक्तत्वपंजीविप्रमाण्याति रिक्तप्रमाणबोधितेष्टसाधनताकत्वं। तद्रहितत्वमलौकिकत्वं। एतच्च भोजनादौ व्यभिचारवारणं

५

अ॰ प्र॰ या। चैनेवमविगीतपदवैयर्थ्यमागमस्यागमनादेरलौकिकपदेनैवनारणादितिवाच्यं। वेदबोधितकर्त्तव्यताविशिष्टबलवदनिष्टाननुबं
४ धीष्टसाधनताकत्वस्यसाध्यतयाश्येनयागेव्यभिचारवारकत्वात्। अतस्यग्राह्यबोधितेष्टसाधनताकत्वेनालौकिकत्वात्। एतदपि
श्येनयागेवलव दनिष्टाननुबंधित्वंनयमतेतन्मतेबोध्यमिति। मानसएवेति। तथाचजातिविशेषएवतत्पदशक्यतावच्छेदकइति
भावः। अविनिगमइति। तथाचकायिकादिकमपिनमस्कारपदवाच्यमितिभावः। ताननतापीति। जातिसांकर्यात्कायिकत्वाविकये।
रेकजात्यसिद्धेः। शक्यतावच्छेदकाभावात्तदुभयंननमस्कारपदवाच्यमित्यर्थः। कथंतर्हितात्पर्यंतदनुमानमित्यतआह। अनुग
तेरिति। अयंज्ञानविशेषरूपनमस्कारवाच्यउन्माद्यबुद्धेत्वकदंडवत्पतनादिकारिवादित्यादिप्रकारेणानुमानेबोध्यंमनसेति।
मनोव्यापारेरित्यर्थः। तेनमनोभिरितिवहुवचनं नानुचितमितिभावः। ननुतावन्त्रित्यादिनाचेष्टामात्रवृत्तिजात्यनपवादाद्विनिग
मकाभावप्रदर्शनएव। मनःपदस्यमुख्यार्थत्वसंभवेव्यापारलक्षणाकल्पनमयुक्तंचात्यतआशयंतदर्शिनिधायाह। इत्येकइति। जातित्रय राम॰
मित्युपलक्षणंसंकरभयेनाधिकस्यापिसंभवात्। अत्रइत्यस्वरसोद्भावनं। तद्बीजंतुजात्यर्थेप्रतिसन्नकडस्थरिताद्यपिनानार्थानसा ४

योयुगपद्भवत्येवेत्याहेति। कल्प्यनमयुक्तं। तात्पर्याभावेचा। वृत्तिरपिनस्याश्रास्वापकर्मबोधकत्वकृत्त्वावच्छेदकजाति
मत्त्वस्यप्रवृत्तिनिमित्तस्यसंभवात्तनानार्थतापि। सान्वेति। कर्तृत्वमुनिप्रणामापेक्षयाईश्वरप्रणामे। कर्तृत्वसंग्रहापेक्षयामुनिप्रणामेच
व्यवधानमस्त्येवेत्यर्थः। पूर्वकालत्वमात्रार्थत्वादिति। नचैवंभोजनानंतरंमासादिनाव्यवधानेपिभुक्त्वाव्रजतीतिप्रयोगःस्यादितिवा
च्यं। तथाविवक्षायामिष्टत्वादितिभावः। अत्रेदमनभिमतिबीजमाहः प्रतीतिबलेनाव्यवधानपर्यंतंशक्येनाहभुक्त्वाव्रजतीत्यत्रभोज
भोजनसामयंगमनयोः प्रतीतिरपितभोजनमात्रापेक्षयाविलंवितत्वास्मिन्नस्त्येवचालितइति। अतएवक्त्वातःकारणताग्रहोपि। नचभोज
नानंतरमव्यवहितत्वाभिमतयोगत्वक्षवादसंभवीदमितिवाच्यं। क्रियांतराणुकूलविलंवाभावस्याव्यवधानपदार्थत्वात्। तदनुकूल
क्रियायास्तदव्यवधायकत्वात्। अन्यथाव्यापारव्यवहितानामिंद्रियादीनामजनकत्वापत्तेरिति। तथात्वेपीति। नियतोपस्थितिकाले
पीत्यर्थः। प्रधानक्रियामिति। प्रधानत्वंक्रियायामसमानकालत्वं। तथाचासमानकालीनसमानकर्तृकानेकक्रियात्वेनालिंगेन
होपातपूर्वत्वधीरितिनतत्रापिव्याप्तिः। नचासमानकालीनत्वंकृतउपस्थितमितिवक्तव्यं। अत्यन्तयापूर्वत्वस्याशक्यत्वेपित

म०व० स्फुत्वापत्ययश्चाक्त्वात्पूगमारभिन्नकालीनप्रयत्नसाध्यत्वंक्रियायांप्रधानत्वमित्यन्येनतुभिन्नकालत्वंव्रजनपूर्वकालतयाप्युपप
५ न्नमितिकथंभोजनपूर्वकालत्वाक्षेपइत्याशंकातोऽथोसि।व्रजनक्रियाया अपीति।नतुव्रजतीतिलडर्थस्यवर्तमानकालत्वेनव्रजने
पूर्वकालत्वबाधान्नेवमितिचेन्न।व्रजनकालस्यवर्तमानत्वेपिभिन्ननिरूपितपूर्वकालत्वाविरोधात्।भुक्त्वाव्रजगामेत्यादौतथाप्यप्रतीत्या
रात्स्मृतेपिलटःप्रयोगदर्शनाच्चैकेयमित्यपाङ्अनद्य,क्तांतस्यपश्चात्प्रयोगएवेत्याह।नचेति।स्वेच्छाधीनपदप्रयोगस्यानियमादितिभा
वः।केचित्तुपूर्वोक्तमेवस्पष्टयन्तिनचेत्यादिनतुक्तोति।क्त्वाप्रत्ययस्यसमानकर्तृकत्वरूपकृत्यर्थएवान्वयनियमादतएववैपरीत्ये
नापिनाबुभवइतिभावः।तदपेक्षांतानिष्ठांअनेकक्रियेति।नियतक्रियापूर्वत्वाक्षेपकाभावादितिभावः।नचभुजिक्रियायाःप्रधान्ये
नोपस्थितेस्तत्रैवपूर्वकालत्वंकल्प्यतइतिवाच्यं।प्राधान्येनोपस्थितिर्हिशाब्दबोधेआकांक्षाप्रयोजकत्वेनकार्यंचिन्निमित्तिकास्याउपस्थि
तेत्वाक्षेपेतुभावनेतत्त्वच्छानिपदस्यार्थतेतंत्रमितितदधीनान्यतरस्योर्वीपर्यायप्रकारोपिनप्रधानक्रियापूर्वत्वधीसस्थालिंगाभावात्।नचा राम०
क्षेपलब्धस्यापिशाब्दबोधविषयत्वमित्याकांक्षावशाद्बोधान्येनोपस्थितक्रियायामेवतदन्वयधीरितिवाच्यं।शाब्दीह्याकांक्षाशब्देनैवपरि ५

र्पूर्वत इति न्यायेन । तथात्वात् । अत एव भुक्त्वा व्रजति भुक्त्वा जगामेत्यादौ भुजनादेः कालान्तरसंबंधित्वेनोपस्थितस्तथा कालान्
यनिराकांक्षतया सा क्रिया हेतुजिक्रियायामेव पूर्वभाव इति निरस्तं । तद्भुक्त्वा जगामेत्यत्र तत्कालसंबंधित्वेनोपस्थिते भोजने पूर्व
कालत्वानन्वयप्रसंगाच्च । यदि च तादृशं निरूपितपूर्वत्वान्वयेन विरोधः स्यात् भोजनादावपि तद्वदेवास्ति । न चाऽसमानका
लीनसमानकर्तृकानेकक्रियात्वेन तदाक्षेपे न दोष इति वाच्यं । परेण समानकर्तृकत्वमात्रस्यैव क्त्वावाच्यत्वाभ्युपगमेन तेन रू
पेणानुपस्थितेः । व्याप्यतावच्छेदकरूपेणोपस्थितेरेवाक्षेपांगत्वात् । तस्मात् हेतुत्वे वाऽभ्युपगमे वा समानकर्तृकत्वमात्रस्यैवार्थ
त्वापत्तेः । यद्यप्येवमप्यसमानकालीनानेकक्रियात्वेन तदाक्षेपः संभवति एवं तथापि भावनियत क्रियापूर्वत्वधीः स्यात् । असमा
नकालीनत्वस्य शक्यत्वाभ्युपगमे किमपराद्धं पूर्वकालत्वेन येन तत्र शक्यं किं वाक्षेप्यमिति तिङ्समणां बोध्यं । तस्मादिति । न चैवं
क्त्वान्तः पूर्वकालत्वोपस्थितावपि कृत्तः प्रधानक्रियायां तद्वयनियम इति वाच्यं । प्रत्ययस्य प्रकृत्यर्थान्वितस्वार्थबोधकत्वात् ।
उभयमिति । पूर्वकालत्वं समानकर्तृकत्वं चेत्यर्थः । क्त्वो विति । धर्मभेदात् ऽपस्थितधर्मिभेदविवक्षया द्विवचनं । न तूक्ताः क

6

मं०व०
६

न्नेरिशाक्तिविरहाद्भोजनकर्तुरत्र पश्चितो कथमभेदान्वयधीरिति चेन्न। न। अभिन्नकर्तृकत्वे भेदांशस्यान्यलभ्यत्वेनानाकांक्षत्वेपि कर्त्रैश
स्य शक्यत्वाभ्युपगमात्। यद्वा ज्ञातिमात्रस्य शक्यत्वाद्भोजनव्रजनकर्त्रोरैक्याधिकरणस्य वाक्यार्थत्वेन भानं। तथा च व्रजनज्ञातिमा
न्व्रजनपूर्वकालीनभोजनज्ञातिमानित्यन्वयः। न चैवं चैत्रो गच्छति मैत्रो भुनक्तीति वाक्ये नोक्तस्थले चैत्रो गच्छतीति भिन्नकर्तृकत्वेपि क्त्वा
प्रयोगः स्यादिति वाच्यं। तत्र तस्यासाधुत्वात्। समानकर्तृकक्रियायामेव तथात्वादिति। मुखमिति। त्वयापि प्रधानक्रियायामेव पूर्वका
लत्वाक्षेपाभ्युपगमादनन्यगत्या तथाभ्युपगमाद्वादिति भावः। अनुभव इति। एतेनानुभव एवात्र विनिगमक इति सूचितं। तस्मादुप्र
धानेति। न च प्रकृत्यर्थगतस्वार्थभानाद्व्युत्पत्तिविरोध इति वाच्यं। प्रकृत्यर्थान्वयमात्रे व्युत्पत्तेः। प्रकृते चानंतर्यनिरूपकत्वेन भोजनस्य
पप्रकृत्यर्थान्वयोस्त्वेवेति भावः। सुविभक्तावेव तथा नियमादन्यत्र तथाभावेप्यदोष इत्यप्याहुः। एवं च भोजनज्ञातिमान् भोजनानंतर
व्रजनकृतिमानित्यन्वयः। न च भोजनस्योभयत्रान्वये दोषः। घटेनेत्यादौ घटादेरेकस्य तृतीयोपस्थाप्यकरणत्वैकत्वाभ्यामन्वयदर्शना रामं०
दित्याहुः। आराध्यत्वेनेति। आराधनाविषयत्वेनेत्यर्थः। वेदादीति। फलानुपधानावनिश्चयः अनुस्ता। तत्र निश्चयत्वमप्रामाण्यशंकाना ६

स्कंदादिनत्वो। तत्र च वेदबोधितत्वं प्रयोजकमिति ह्यचा वेदादौ स्युक्तं न च लक्षणानामनुगतं तेन नाननुगम इत्याह। भक्तिश्रद्धे इति। भाव
प्रधानो निर्देशः। जातिविशेषो नमस्कारहेतुज्ञाननिष्ठजातिविशेषो। नन्वेकज्ञाननिष्ठत्वे उत्पत्त्युक्तिकजापत्तिः। भिन्नज्ञाननिष्ठत्वे य
त्रैकसमूहालंबनेन नमस्कारः कृतस्तत्राव्याप्तिः। क्वचिदेकनिष्ठत्वे क्वचिच्च भिन्ननिष्ठत्वे जातिसंकरापत्तेरिति चेन्न। भिन्ननिष्ठत्वेपि
समूहालंबनज्ञाननमस्कारस्य न फलदातृत्वमिति वदंति। केचित्तु नमस्कारनिष्ठा भुक्तजातिविशेषादित्याहुः। तथापि लाघवादिति।
उपसर्गाणां शक्तत्वे शक्त्यंतरकल्पनागौरवं स्यादित्यर्थः। नन्वेवं शक्त्यंतरकल्पनमेवेत्यत आह। एवं हीति। तत्रैव नानाशक्तिर्यत्र परस्प
रव्यभिचारिनानाप्रवृत्तिनिमित्तमिति भावः। यद्यपि जिपूर्वं पत्वेन शक्तौ शक्त्यंतरकल्पनागौरवमेव बाधकं तथापि लाघवेन प्रवृत्ति
निमित्तभेदमात्रस्येव शक्तिभेदप्रयोजकतया पराजित्वेनापि उत्कृष्टजयत्वावच्छेदेन शक्तौ शक्त्यंतरमेवेति तत्रापरितोषमनुसमाधानां
तरमाह। प्रतिष्ठत इति। प्रकर्षविशिष्टधात्वर्थान्वयासंभवेनावश्य ह्यर्थे गमनस्याख्यातार्थान्वयानुपपत्त्या प्रत्यूह प्रवृद्धस्य गमन
गमनयोरुपस्थापने परस्परविरोधेनान्वयबोधाभावप्रसंगेन च प्रोत्तरस्थावेनानन्यगतिकतया गमने शक्तिकल्पनादिति भावः।

7

भ०व० नचत्वप्रशाद्यस्याभावमात्रवाचकत्वमस्तु। तथा च धात्वर्थगतिनिवृत्त्यभाववत्त्वेनान्वये परं पर्याप्सकार्यर्थे प्रत्ययार्थान्वयोपीति न शक्तता
८ वच्छेदकत्वकल्पनमिति चेन्न। न भवेदेवं यदि गतिनिवृत्त्यभावप्रकारिका धीस्ततो न चेत्तन्न चैवं। गमनत्वप्रकारकान्वयानुभवात्। केचित्
तु प्रशाद्यस्याभाववचनत्वेपि धात्वर्थस्य गत्यभावस्य पर्यन्तत्वेनानुपस्थित्या गत्यभावाभाववत्त्वेनापि धीर्दुर्लभेत्याहुः॥ नत्वयन्तूपसर्गस्य
नसार्थकत्वे तदा सुगतिर्भाषणादयाद्येषु संग्रहेन कथं वङ्क्वा हि समासइति चेन्न। द्योतकत्वेपि तत्वतस्य साधुत्वादित्याहुः॥ नव्यास्तु
।उपसर्गाणां वाचकत्वे ऽर्थवदित्यादिनैव प्रातिपदिकसंज्ञायां सिद्धायां निपातस्यानर्थकस्येत्यादेर्वैयर्थ्यापत्तिः समासान्तरस्याभिमान्निविधाभूत
स्यानर्थकप्रसंगस्तथा च तत्तदनुपपत्तेरनर्थकस्येत्यभिधानं च तेषां द्योतकत्वे बीजमित्याहुः॥ ननु गमनप्रकृष्टजयादौ शक्तिरेव न कुतो
धातूपसर्गयोः शक्तिर्विभिन्नगमकत्वेन गणाल्लक्षणयैवोपपत्तेरनन्यलभ्यस्यैव शब्दार्थत्वादित्याशयेनाह। विरोधीति। विरोधित्वं संबंधेनेव
लक्षणयेत्यर्थः॥ प्रजयतीति। विशेष्यवाचकस्य जयवाचकस्य विशिष्टे प्रकृष्टजये लक्षणेत्यर्थः॥ नचैकदेशे जयांशेन लक्षणास्वास्मि राम०
न्न संबंधस्याभावात्। नच प्रकृष्टांशस्य लक्षणया जयांशस्य शक्त्योपस्थितावभेदान्वयेन प्रकृष्टजयोपस्थितिरिति वाच्यं। युगपद्वृत्तिद्वयवि ८

रोधात्। अत एव गंगायां घोष इत्यत्रापि न गंगातीरत्वेनोपस्थितिरपि तु वक्तृगत्या तस्य तीरत्वेनेति सिद्धांत इति चेत्। अत्र वदंति। विशिष्यवाचक
स्य जयवाचकस्य विशिष्टे प्रकर्षविशिष्टे लक्षणैवेत्यर्थः। तथा च चिंतामणिकारमते वृत्तिद्वयापत्तेरिष्टतयाऽक्तदृष्टांतस्य लक्षणयाऽज
यांशस्य शक्त्यैवोपस्थितावभेदान्वयाद्विशिष्टोपस्थितिः। न चैकपदोपस्थाप्ययोरन्वयबोधो न दृष्टचर इति वाच्यं। सत्या कोशादावदर्शन
मात्रस्यादोषत्वात्। आख्यातार्थकृतौ विष्टसाधनत्वस्य लडर्थवर्तमानत्वादेश्चान्वयदर्शनात्। योगरूढौ त्यादेरत्वोपस्थाप्यत्वस्य गत
त्वशक्यान्वयबोधकत्वदर्शनाच्च। अत्र भावकत्वे च रज्ञत्वं प्रयोजकं न तु लाक्षणिकत्वाभाव इति भातोऽभेदान्वयधीः॥ न त्वेवं गंगातीर
त्वेनाप्युपस्थित्यापत्तिरिति चेन्मैवं। तत्र शक्तिलक्षणाभ्यां पूरतीरोपस्थितावपि नाभेदान्वयः। अयोग्यत्वात्। मनुसंबंधित्वेन तथाऽ
पस्थितेः। न च संबंधोऽन्वयतया भासत इति वाच्यं। स्वतंत्रपदार्थयोरुपस्थितावभेदान्वयस्यैवाकांक्षाक्रमेण व्युत्पत्तिसिद्धत्वात्। अत एव
व षष्ठी समासादेर्विभक्त्यर्थलक्षणा। न च भूतले घटो नेत्यत्र घटस्याभाव इति वदन्वयो भावीति वाच्यं। न भेदे व्युत्पत्तिभेदात्। अत एव घटस
मवाय इत्यत्र घटस्य समवाय इति नान्वयधीः। न वा घटाभाव इत्यत्र तथाधीरिति। एतन्मते गंगातीरत्वेन धीरिष्टैवेत्याहुः। न च नेदेशा

भ०व०
८

संबंधाभावान्नलक्षणेत्यत आह। विशेष्येति। यद्यपि विशिष्टस्यार्थांतरत्वेपसिद्धांतो ऽनर्थांतरत्वे संबंधानुपपत्तिः तथापि प्रकृष्टे
जयस्याभेदरूपसंबंधाल्लक्षणोपपत्तिः। नचैवं जये पि लक्षणायां न दोष इति वाच्यं। संबंधिभावच्छेदकभेदं विनाभेदसंबंधस्यापि
ग्रहीतुमशक्यत्वात्। नहि घटो घट इत्यभेदधीः। प्रकृते च प्रकृष्टत्वेन जयत्वेन चोपस्थितस्याभेदसंबंधस्य ग्रहसंभवात्। नचैवं प्रकृष्टजयत्वे
नोपस्थिते विशिष्टजयत्वावच्छिन्नाभेदग्रहसंभवाद्विशिष्टलक्षणैवास्त्विति वाच्यं। नीलघटो घट इत्यनेवं तत्राप्यभेदसंबंधाग्रहात्। अस्तु
वा तथा तथापि प्रकृते संगतिरिति। प्रादेशिति। तथा च तत्तदर्थे ज्ञात्यर्थयोः एकत्वेनैव द्योतकत्वमिति भावः। लुप्त इति। नचैवं षष्ठीसमासेपि
षष्ठ्यर्थलक्षणा न स्यात्लुप्तस्मृतषष्ठीतस्तदुपस्थितेरिति वाच्यं। प्रकृतिं विना प्रत्ययस्य निराकांक्षत्वात्तथा धातुज्ञानं विना ग्राह्यबोधासंभवे
नात्र तथात्वात्। नन्विदमाह। धातुलोपमिति। राजपुरुषादिस्थले च षष्ठीज्ञानं विनापि लक्षणया राजांशो निराकांक्षत्वयबोधसंभवेनात्तथात्वात्रय
न्नदैवात्षष्ठीस्मरणं तत्र का गतिरिति चेन्न। एकत्र तथा कल्पने ऽन्यत्रापि तथात्वात्। अतोऽन्नलक्षणेत्यप्याहुः। विशिष्टेति। क्षमाजन्याचारत्वेने राम०
त्यर्थः। समीहितक्रियेति। क्रियापदं क्रियमाणपरं इष्टप्रतिबंधकदुरितनिवृत्तिव्याप्तिनिरासाय। प्रत्यूहः। अविघ्नेति। यद्यपि प्रलये विच्छेदस्य ८

संभवस्तथापि तज्ज्ञानमविच्छेदे बोध्यः। शिष्येति। शिष्टत्वमत्रान्तत्वं। अनुमानादिति। परिशेषानुमानादित्यर्थः। अयोग्यतानिश्चयत्वेन शा
ब्दबोधहेतुतेति मन्वानः शंकते नन्वेवमिति। ननु कारणत्वग्रहो व्यभिचारग्रहेपि दृष्ट इत्यत आह तृणेति। तृणत्ववन्हित्वाव
च्छेदेनेति शेषः। सामानाधिकरण्येन कारणत्वस्य तत्रापि ग्रहात्। न च तद्देवान्नापि कारणत्वग्रहोस्त्विति वाच्यं अरणिमण्यभाववति
तृणे मणिविशेषितृणत्वव्यतिरिक्तवह्निहेतुग्राहकस्याभावात्। न च व्यक्तिरेव तद्ग्राहिका व्यभिचारेणात्मस्य कारणत्वस्य बाधात्। अध
ष्येव मणितृणत्वसामानाधिकरण्येन स्तुत्या हेतुतामाह। संभवत्येवं तथापि समाप्तित्वं मंगलत्वावच्छेदेन कार्यकारणभावोऽग्र
ह्यग्रह इति भावः। केचित्तु पर्वतेवन्हिव्याप्यवत्तायहेपि यथा तत्र न वन्हिग्रहस्तथा कारणतावच्छेदकरूपवत्वग्रहेपि तृणादेर्न
कारणताग्रह इत्याहुः। मंगलत्वावच्छिन्नस्य व्यभिचारनिश्चयाभावान्न संदेहस्य बाधप्रतिबंधकत्वान्न स्वछेदेन हेतुत्वग्रहो भवत्ये
वेत्याह पोष्येति। संशयनिश्चयसाधारणायोग्यताज्ञानत्वेनैव हेतुतेति भावः। यद्यपि मानसनमस्कारा भावी नयोग्या उपलब्धिनि
श्चयस्तथापि प्रकारान्तरेणानिश्चय इति भावः। विशेषेति। ऐहिकमंगलत्वावच्छेदेनेत्यर्थः। सामान्यतः मंगलत्वावच्छेदेनेत्यर्थः। अय

9

भ०व० घेति। तथा च तत्र मंगलमेव न सांगमिति भावः। अवयद्यप्यसंभवीत्यव्ययः। आशुविनाशिनामिति। क्षणिकाणामिति शेषः। नत्ववि
८ घ्नसमसंख्यामंगलत्वेन हेतुतायां नानुगम इत्यरुचेराह केचेति। ननु विघ्नसंदेहवतां शिष्टानामाचारेणानुमितश्रुत्या तथैव बोधनात्सं
शयेपि प्रवृत्तिरित्यस्वरसादाह न चेति। अन्वयेति। यद्यपि विघ्नसमसंख्यमंगलस्य हेतुत्वान्नान्वयव्यभिचारः समाप्तिविशेषे हेतुत्वान्न
व्यतिरेकव्यभिचारः अन्यथा प्रायश्चित्तजन्योपि विघ्नध्वंसे व्यभिचारास्तोपि न फलं स्यात्तथापि प्रत्यक्षस्य प्रकारोत्तरमनुसंधेयं। सविशेषणे
हीति। अहं स्वर्गी स्यामित्यत्रैव गौरवादिना विशेष्ये बाधादिति भावः। विघ्नात्यंताभाव इत्युपलक्षणं। अनुत्पादध्वंसावपि द्रष्टव्यौ। न
भावा क्षतोत्यंताभावपदं तत्परमेवात्मनि तदत्यंताभावो दित्यपि वदंति। लोकेति। यद्यप्येवमपि सांगाद्वैदिककर्मणः फलावश्यंभाव
नियमोऽभ्यएव न चाविघ्नस्यापि मंगलांगत्वं फलवत्संनिधिश्रूयमाणस्येवांगत्वात्तथापि विघ्ने सत्येव सांगात्वादपि तस्मात्फलं तथैव
विधिबोधनात्। तदिदमाह। विघ्नेसतीति। यत्तु प्रायश्चित्तवद्दुरितवत्त्वे नाधिकारात्तदभावेऽधिकाराभावान्मंगलं न सांगमिति तत् राम०
भ्रंते हि तद्दैवविघ्नसंदेहेन प्रवर्तेत। वैदिकेऽधिकारनिश्चयस्यैव प्रवर्तकत्वात्। विघ्नध्वंसार्थीति। पापध्वंसार्थीत्यर्थः। अत्र च तन्न ८

पिद्रांकितानिष्टवारणार्थं प्रवृत्तिर्दृष्टैवेत्याह शंकितेति। मनसेति। तथा च दुरितवत्त्वेनाधिकार इति भावः। यथा च कामनाज्ञानमपि प्र
योजकं तथोक्तं प्रत्यक्षप्रकारे अधिकारी। नि। प्रवृत्तिप्रयोजकमित्यर्थः। तथा चोक्तयत्र दुरितवत्त्वमेवाधिकारः। प्रथमेऽधिकारसं
देहत्वेन प्रयोजकत्वमन्येवाधिकारज्ञानवत्त्वेनेति। अतएवेत्यस्यार्तिहेतुंपमाह। दुरितवत्त्वेनेति। नन्वेवं देवकथमित्यत आह वि
रोधादिति। अधिकारस्य फलजनकविशेषणतया एकत्र जनकत्वप्रतिबंधकत्वविरोधादित्यर्थः। तएवं मूलोक्तसमाप्त्यभिप्राये
ण। अतएवोक्तंसमाप्तिकामनयाइति। विघ्नध्वंसफलकत्वे च तत्कामनाया एवाधिकारत्वात्। विघ्नध्वंसफलाभिप्रायेण। उत्तरदो
षः। प्रायश्चित्तवत्विघ्नस्यापितद्ध्वंसजनकत्वात्। एवं च वेदिकेपि अधिकारानिश्चयस्यैव प्रवर्तकत्वमिति दूषणमुभयत्रतुल्यमिति बो
ध्यं। फलसंदेहपर्यवसन्नतया द्वारसंदेहे प्रवृत्तिः संभवत्येव नत्वनिमित्तसंदेहे दृष्टेति च नद्वारसंदेहः। किंत्वनिमित्तसंदेह इत्याह ने नि
मित्तिके हीति। नहिज्यायाने मित्तिकत्वेपि संदेहस्यात्तथात्वात्तदृष्टद्यायुक्तामित्यत आह अपि चेति। मंगलत्वं चेति। प्रतियोगिन्य
निव्याप्तिवारणायान्यस्य समत इति तदन्यत्वे सतीत्यर्थः। केचित्तु विघ्नध्वंसप्रतिबंधकदुरदृष्टाभावे [illegible] तिव्याप्तिवा

10

म॰ वृ॰ रणायसतइतिस्वाभावइतिनोक्तदोषावकाशः [illegible] इत्याहुः। यत्तुनिवृत्तिप्रागभावे अतिव्याप्तिवारणायतत्र। नच
१० सप्रतियोगित्वेनिजध्वंसपरत्वेनैवतन्निरासइतिवाच्यं प्रतियोगिपूर्वंतत्प्रागभावासत्वापत्तेः। तस्मात्प्रतियोगिजन्यएव सइति। तत्राऽ
पसिद्धांतात्। प्रतियोगिपूर्वंचप्रतियोगिप्रागभावएवतत्प्रागभावस्यव्यवहारहेतुरेवंचप्रतियोगीतत्प्रागभावध्वंसनिवृत्तिप्राग
भावव्यवहारहेतुस्सनचप्रथमस्याद्यविशेषणेनैवनिरासश्चरमस्यानिवृत्त्यजनकत्वादेवेति। कारीर्यामतिव्याप्तिवारणायप्रा
रिप्सितेति। कालादावतिव्याप्तेराहअसाधारणेति। नाहृष्टानि वृत्तिमात्रनिष्ठकार्यतानिरूपितकारणताश्रयत्वमित्यर्थः। नन्वेवं
प्रतियोगिव्यप्रसंगाद्योपदंव्यर्थं। तत्रध्वंसप्रति तेनतेनरूपेण जनकत्वाऽस्वरूपगमेनाऽस्योक्तत्वात्। यद्विप्रारिप्सितप्रतिबंधक
इतिस्यापिप्रायश्चित्तनाश्यताहृतादृष्टत्वेनापिविशेष्यं। प्रारिप्सितप्रतिबंधकविघ्नध्वंसमात्रकामनाकृतश्रवणादिज्ञानस्य
वदि संग्राह्यत्वमेवान्यत्राप्रसंगएवेत्याहुः। धात्वर्थेति। यथाधात्वर्थानेकक्रियाव्यापिता वह्न्याद्युक्तौ किंतु [illegible] वादिकं तथा मंगलत्वमपि राम॰
नेकामित्यर्थः। पदांतरेति। गोबलीवर्दन्यायादितिभावः। अथेति। नमस्कार इतिपदानंतरं फलदायीतिपदमध्याहरंतीत्यर्थः। १०

तथा चोक्तक्रमेण क्रियत इति सा ध्येऽदृष्टफल हाधिवेस तिक्रमक्रियमाणगुरुतमादिनमस्कारवं हेतुः। निर्विसर्गपाठपक्षेनमस्का
रजन्यादृष्टफलदायी त्यर्थः। अध्याहरंतीत्यस्य रससूचनं। तद्धीजं शिष्टाचारादिति ने नाशिष्टक्रियमाणगुरुतमादिनमस्कारवं हेतु
रुक्तः॥ शिष्टत्वं चाधीनतत्वं। व्युत्क्रमनमस्कारस्य च निष्फलत्वे नभ्रमनिबंधनत्वमित्येव व्यभिचारवारणेऽध्याहारो व्यर्थ इति। तुल्यं तत्र
णेति। व्युत्क्रमेणेत्यर्थः। श्रुतिरपीति। श्रुत्येपीत्यर्थः। अन्ये त्विति। अन्तं च स्मेत्यर्थः। नायमिति। तथा चात्रश्रुत्यपेक्षया परस्य प्रकरणस्य
न दोषं न्यं किंतु वलवत्रमेव त्यर्थः। तथाहीति। भिन्नप्रकारेणायुगपदुपस्थितेनोद्बोधोपस्थापितप्रकारद्वयोत्सहितिदइति तात्पर्यमिति
भावः। अत्र चातः पदं व्यर्थमिति पूर्वपक्षदृश्यायां न युगपदुपस्थितिर्न वा भिन्नप्रकारेणेति नायं विषय इत्याहाचेति। अत्रेतियो अन्वये हे
अन्वयबोधे स्वयाजनकत्वात् अन्वयबोधाजनकत्वात्। ननु तथापि शब्दतः अतः पदमनुपादेयमनाधध्याहारेतथैव व्युत्पत्ते
श्लो रुपस्थिते पंचम्यादौ तथा दर्शनादित्यत आह यथेति गृहपूर्वेति। मीमांसासूत्रस्य चतुर्थे चाध्याये अथात इति। तद्धीति भयेत्वाद्यन्यधर्मे धर्मधर्मिभा
वसत्त्वे हेतुत्वनियमादिति भावः। भिन्नाधिकरणेति। अभावरूपधर्मायदिद्व्यादिभिन्नाः स्युरभावास्तु रीत्यापादनं। एवं च सतमप

कि॰ व॰ भ दार्थापत्तिरित्यसमसमयपदार्थत्वापत्तिरित्यर्थो विवेच्यः ॥ एतेन यथाश्रुतेऽइष्टापत्तिः अभावमादाय समसमयपदार्थाभ्युपगमात् ॥ अथस

११ मसमभावापत्तिरित्यर्थस्तदप्रसिद्धिरित्यादि निरस्तं । परस्परमिति तेनो । षष्ठ्यन्तमध्ये कस्यापि किंचिद्विशेषणमित्यर्थो न त्वन्योन्यं विशेषणवि

शेष्यभावस्तत्र लक्षणांशगुणत्वमित्यादिमयं थ्यविरोधात् । केचित्तु गुणत्वमित्यस्याद्रव्यघटितगुणलक्षणांतरे तात्पर्यमित्याहुः । अन्यमेव सु

विशेषणविशेष्यभावइत्याहुः ॥ मिथोव्यभिचाराभावेनेति । यद्यपि वृत्तष्टद्व इत्यादि विशेषणसमासहर्षो नान्येवं तथापि

योगदर्शनान्नत्तथा प्रकृते तु न तथेत्याहुः ॥ धर्मपदस्येति निर्वचाभेदे षष्ठ्यनुपपत्तिः भेदे समसमपदार्थापत्तिदोष इति वाच्यं । तत्तत्पदार्थ

विशेषभेदेन पदार्थमात्राच्चाभेदेनोभयसंभवादिति भावः ॥ अत्राहुः द्योत्यमाहेति । यद्यपि धात्वर्थगतातिशयद्योतकत्वमेवोपसर्गाणां प्रकृ

ते च न संग्रहो धात्वर्थस्तथापि अत्र कारणकारणे अतिशयस्य धात्वर्थगतस्याद्योतनात् कार्येपि संग्रहे गत्वर्थं प्राप्तिरिति कृत्वा तयोक्तं ॥ ननु सू

त्रसमूहरूपप्रकरणस्यानानुपपत्तावइत्यत आह प्रकरणमिति । व्याख्येयग्रंथ इति यद्यपि भाष्यस्य न व्याख्येयमस्ति तथापि वैशेषिकसूत्रं तथे राम॰

ति केचित् विशेषकास्तत्स्था चार्यव्याख्येयो भाष्यरूपग्रंथ एव प्रकरणमिति । इतरेति । एकत्रोपनिबंध इत्यर्थः । एकदेशो ऽवयवः प्रदाते (?) । संभ ११

वीत्यत आह इत्यादीति। संग्रहेति। मोक्षसंग्रहयोरभेदान्वयानुपपत्तेरित्यर्थः। तत्त्वेति। महोदयहेतुत्वमित्यर्थः। साक्षात्साध्यस्येति। तत्त्वज्ञान
रूपस्येत्यर्थः। यद्यपि तत्त्वपि न संग्रहस्य साक्षात्साध्यं। तथापि मोक्षापेक्षया तथात्वं बोध्यं। लक्षणापत्तेश्चेति। यद्यपि बहुव्रीहिपक्षेपि लक्ष
णैवेत्यविशेषस्तथापि समासलक्षणाया निरूढत्वेन शक्तितुल्यकल्पत्वादिति भावः। केचित्तु समासलक्षणाजनकलक्षणायोक्तकल्पत्वे
पि महोदयपदस्य मोक्षलक्षणापत्तेश्चेत्यर्थ इत्याहुः। मत्पक्षे तथा लक्षणा नास्तीति दर्शयन्नाह सर्वइति। नन्वनारोपितरूपं आरोपा
विषयत्वमेव तत्त्वं पदार्थानां यात्वं तत्त्वाप्रसिद्धमित्याह नन्वारोपितेति। यद्यप्येवमप्यभावत्वेनोपस्थितिदशायामारोपाविषयत्वम
प्रसिद्धमेव तथाप्यभावेऽप्यभावत्वेनोपस्थितिदशायामारोपाविषयत्वं नास्तीति शाकामात्रं हृदयतिनीलारोपेति। तद्दोषेति। तवमते ष
तदारोपानुपपत्तिरित्यर्थः। कथं नीलं तम इति तथा च ध्वंसेपि तारोपवद्दोषप्रावल्याद्भावत्वेनोपस्थितिदशायामपि नीलारो
पोभ्युपेयः। एवं च तत्रापि तदारोपाविषयत्वमप्रसिद्धमेवेति भावः। इदं त्वेनेति। तथा चाभावत्वेनोपस्थितिदशायामारोपाविषय
त्वमेवेत्यर्थः। इदं नीलमिति तो। नचेष्टापत्तिः। नीलं तम इति सर्वानुभवादिति भावः। तद्विषयत्वमिति यद्यप्येवं घटाविषयत्वं तत्त्वमि

12

किं॰व॰ त्तिपर्यवसितं तं तथा च घटत्वादेस्तथात्वं न स्यात् । न चेष्टापत्तिः यद्यत्रास्तीत्यादिना तस्य तत्त्वतः प्रत्युपगमात् तथापि त्वपदेन धर्माभिधानात् स्व-
१२ मा विषयधर्मो घटत्वादिरेव तत्त्वमिति भावः । न चैवं घटत्वस्य प्रमाविषयधर्मत्वाद्घटतत्त्वतापि स्यादिति पतञ्जाहत्वात् तत्त्वेति । यदवच्छेदेन
त्रे यत्र यदस्ति तदवच्छेदेन तत्र तत्त्वं । यदवच्छेदेन यत्र यन्नास्ति तदवच्छेदेन तत्र तदतत्त्वमित्यर्थः ॥ ननूक्तलक्षणं प्रमेयत्वादावव्याप्तं । न च
तल्लक्षणमेवेति वाच्यं । साधर्म्यवैधर्म्याभ्यामेव विविच्यत इति ग्रंथस्वरसेन साधर्म्यवैधर्म्यमात्रविवेचनीयस्य इतरभेदौपयिकस्य ज्ञव्यत्वादे
रेव तत्त्वस्यान्तर्लक्ष्यत्वादित्यस्वरसादाह यद्वेति । स्वाश्रयप्रतियोगिकत्वं स्वावच्छिन्नप्रतियोगिकत्वं वा । अतो नाव्याप्तिः ॥ अन्योन्याभावस्याश्रयो या
भावव्यवहारविषय इति नाभावादितत्त्वाव्याप्तिरिति वदन्ति तच्चिन्त्यं । तदंशस्य विशेषदर्शने निवेशयत इत्यर्थकतया उपदर्शयं ग्रंथकृतैव व्या
ख्यातत्वात् । विशेषदर्शनस्य च प्रमेयत्वादावपि सत्त्वेन लक्ष्यत्वाविरोधात् । तथा च तत्र नाव्याप्तिरिति शेषः ॥ केचित्तु प्रमेयत्वादेरपि
लक्ष्यत्वमेव । स्वाश्रयस्य च यावत्त्वं नाविवक्षितं येन तत्राव्याप्तिः स्यात् किंतु यत्किंचित्त्वमेव । न चैवं यत्किंचित्स्वाश्रयान्योन्याभावसमानाधि- राम॰
करणतया प्रमेयत्वादावव्याप्तिरेवेति चेत्रांशे सामानाधिकरण्यं परिहितं तदनधिकरणाधिकरणत्वमत्र विवक्षितं । तद्धटत्वादेर्यथासिद्धेः १२

न्योन्याभावानधिकरणे घटेतत्स्यदृत्तेर्नं नचैवं प्रमेयत्वादिकं घटस्यापितत्वंस्यादितिवाच्यं इष्टापत्तेः एवंच यत्ताश्रयान्योन्याभावानधिकरणाधि
करणत्वं यत्र यस्य तत्स्य तत्र तत्त्वमिति पर्यवसितं । यद्यपि पदधिकरणत्वं यत्र यस्य तत्र तत्त्वमित्येवास्तु तथा च पूर्वोक्तदोषोपि तथापि यद्यो
क्तविशेषणविशिष्टाभावेन वैयर्थ्यमनुपाधिभेदाद्वा भेद इत्याहुः । समानाधिकरणपदेन नियतसमानाधिकरणत्वविवक्षया व्याप्यत्वं विव
क्षितं तथा चासामानाधिकरण्येन व्याप्यत्वमुक्तं । एवं च यत्किंचित्स्व आश्रयान्योन्याभाववान्व्याप्यधर्मस्तादात्म्यपि आहुः ॥ इत्थं हीति । गुणा
दिकं गुणसंसर्गाभाववदित्यपि बोध्यं तेन संसर्गाभावस्यापि लाभः अन्योन्याभावस्य संसर्गाभावघटितत्वात्सोपि ज्ञाप्य इत्यथाहुः ॥ ज्ञाने
त इति । यद्यपि जातियोगि प्रमाधीन प्रमाविषयत्वमात्रस्य गमकत्वे धिकं च यथार्थ प्रमितत्वे साध्ये साध्याभावे शिष्टं च तथापि ज्ञामापकत्वे साध्य
प्रमाविषयत्वं हेतुः । यद्विषयस्त्वे ज्ञाष्यादेर्ज्ञानं तद्ग्राह्य ज्ञानविषयत्वमेव वा हेतुः । प्रतियोगीत्यादिकं तु तर्कसूचनायोक्तं न तु हेत्वंतर्ग
तमिति । आद्यं इति । भावाभावयोर्विभागं विना भावाभावान्तर विभागानुपपत्तेरितिभावः । यद्यपि निःश्रेयसोपयोगित्वाविशेषाद्भाव
विभागवदभावविभागोपि शास्त्रे एव युज्यते । तथापि स्वतंत्रेच्छस्य नियोगाद्यनुपपत्तेरितिभावः । नन्वेवं नो द्दिष्ट इत्येवोक्तेन नञ्च्छ थ

कि॰ व॰ गितिविशेषयेदित्यत्रउपादानहयवस्थपगिति। अत्रहि। द्विन्नवैशिष्ट्यमित्याचार्यमतानुसारेणेदं। पद्यप्येवमपिज्ञानाभावादीनामव्याप्तिरेवतथापि
१३ पूर्वोक्तैतात्पर्यं। जातिसङ्करेति। यद्यपिवैशेषिकमतेशरीरत्वंनजातिस्तथापिन्यायनयमभ्युपेत्योक्तं। विपंचितमिति। कारणतत्कारणसाधा
रणस्यैवप्रवर्तकस्यतत्रनिरुक्तत्वादितिभावः। नचात्यंतिकत्वस्यनिवृत्तिविशेषणत्वेऽत्यंताभावः फलतिसचनमुक्तिरसाध्यत्वादित्या
शयेनपृच्छतिनचेति। सुषुप्तस्यापीति। दुःखासमानकालीनत्वंदुःखसमानकालीनत्वात्यंताभाववत्त्वंयदितदासुषुप्तिकालावच्छेदेनतद
त्यंताभावसत्त्वादतिव्याप्तिर्बोध्या। अन्यथाऽग्रेसमानाधिकरणदुःखसमानकालीनत्वादतिव्याप्त्यसंभवइतिद्वेषाजनकेति। नचैवंमुक्ते
दुःखपदंव्यर्थंतत्रध्वंसमात्रेतात्पर्यात्। द्वेषाजनकत्वंयदितदुपधानंतदातिव्याप्तिरथुतदपीत्थंतदाऽप्रसिद्धिरित्यस्मदादिसाधारणद्वे
षाजनकत्वंवाच्यमेवंसत्याहयोगिनामपीति। अन्यथारागद्वेषानुत्पत्त्याविष्टानिष्टसाधनताज्ञानाभावेप्रवृत्त्याद्यनुपपत्तेः। किंवास्मदादिवृत्ति राम॰
त्कटरागद्वेषादिर्विवक्षितः। द्विष्टसंसर्गे इत्यस्यार्थइतियोजयंति। समानाधिकरणेति। इदानींतनमुक्तव्याप्तिवारणायसमानाधिकरणप १३
दंध्वात्मैकत्वादिकमादायासंभववारणायाद्यविशेषपदं। घटरूपादिध्वंसातिव्याप्तिवारणायात्मपदं। चरमविशेषपदंचक्षुर्ज्ञानात्ममनःसंयोग

ध्वंसेऽतिव्याप्तिवारणायनचसोपिध्वंसोमुक्तिरेवेतिवाच्यंमनसोपिध्वंसापत्तेरितिभावः।ज्ञानस्याभीति।यद्यपिज्ञानस्यापिदुःखतयेतिनव्याप्ति
कयंघ्यान्तर्गतमतस्तस्यांतर्भावेव्वेवंयथाविशेषसंभवान्नदूष्यं।तथापिविशेषगुणोत्पत्यादिनादुःखरूपविशेषगुणसमानकालीनत्वंविनश्यत
मितिविवक्षितत्वादिष्टापत्तिरपिचरमज्ञानस्यैकविंशतिध्वंसेष्वभिन्नदुःखान्तर्गततयादोषतादवस्थ्यमेवेतिप्रदर्शनायतदुक्तमितिध्येयं।यद्य
पिसुखदुःखासमानकालीनत्वविवक्षयानोक्तदोषस्तथापितादृशविशेषगुणध्वंसत्वेननस्वतःपुरुषार्थत्वमितिदूषणंद्रष्टव्यं।न
नुसंस्कारस्मृतिःप्रमाणांतदभावेनतत्रसंस्काराभावोनुमेयइत्यतआहतस्येति।तथाचचरमभोगस्यावश्यंसंस्कारजनकत्वमस्तुपेयमि
तिभावः।वस्तुतःसंस्काराजनकत्वंयदिहितदुपहितत्वंतदातिव्याप्तिरथतद्योग्यत्वंतदासंभवोनेनरूपेणास्वतःपुरुषार्थत्वमि
तिभावः।ज्ञानाजनकत्वंयदिहितद्योग्यत्वंतदाऽसंभवइतितंत्रप्रधानमेववावाच्यमितिदूषयतिरोगेति।दुःखसाधने[redacted]
८
ति।नचसंसारितादृशायायाक्तिंचिदुःखसाधनध्वंससंभवादतिव्याप्तिरितिवाच्यंसमानाधिकरणदुःखसाधनप्रागभावा स
हवृत्तिदुःखसाधनध्वंसस्यसान्तिकदुःखात्यंताभावसमोहत्वादुघटादेश्चप्रत्यासत्यभावान्नातिप्रसक्तिः।तस्मात्समानेति।तथाचसुखसमा
नकालीनत्वसमानाधिकरणदुःखप्रागभावसमानदेशीयदुःखध्वंसोऽस्मदादीनांप्रसिद्धःतद्भिन्नदुःखध्वंसोमोक्षइतिपर्यवसानतेननो

14

कं॰वं॰ १५ प्रसिद्धिः। न च समानकालीनपदस्यासंभववारकत्वेन सार्थकत्वेपि समानाधिकरणपदं व्यर्थमिति चेन्न। न देशपदस्याधिकरणसामान्यपरत
याद्वृत्तेनैनन्तत्त्वव्याप्तिवारकत्वात्। शुकादिदुःखध्वंसस्य समानकालीनदुःखप्रागभावेन सह कालेऽधिकरणे समानाधिकरणत्वात्।
न च समानाधिकरणपददानेप्येष दोषः। आत्मरूपाधिकरणस्यात्र विवक्षितत्वात्। न च देशपदमेव तत्परमस्तु तथा च व्यर्थविशेषणत्व
मेवेति वाच्यं। स्वतंत्रेच्छाया नियोगाद्यनुपपत्तेः। यथोक्तव्याख्याने व्यर्थत्वाद्यभावाच्च। न चैवमव्याप्तिवारकत्वेनाद्यविशेषणोत्पाद्यग्रिमग्रंथ
विरोध इति वाच्यं। व्याप्तिमतिक्रांताति व्याप्तिरित्यनेनाव्याप्त्यभिधाने तात्पर्यात्। लक्ष्ये लक्षणातिव्याप्तेर्दुर्घटत्वात्। अव्याप्तिरित्येव पा
ठः। अतिव्याप्तिपाठस्तु क्वाचित्कः। प्रमादिक इत्यपि वदंति। न चैवं पांत्यदुःखध्वंसेति व्याप्तिः। आद्यदुःखपदस्यैकविंशतिप्रभेददुःखप
रतया चरमभोगरूपदुःखप्रागभावसमानदेशत्वाच्च। अत एव प्रागभावपदमप्यर्थवत्। भोगरूपदुःखसमानदेशतया चरमदुःखध्वंसा
संभववारकत्वात्। वयं तु लक्षणद्वये तात्पर्यं। एकत्र देशपदं कालरूपाधिकरणपरं। अपरत्रात्मरूपाधिकरणपरं। तथा च समानाधि
करणदुःखप्रागभावासमानकालीनदुःखध्वंसो मोक्ष इत्येकं। समानकालीनदुःखप्रागभावासमानाधिकरणो दुःखध्वंस इत्यपरं। अ राम॰
त्र चरममुक्तौ संभवेनासंभवादिदानींतनमुक्तव्याप्तिवारणाय प्रथमलक्षणे समानाधिकरणपदं असंभववारणाय द्वितीयलक्षणे स। १५

मो॰ वी॰ २

मानकालीनपदं तद्विशेष्यकत्वमात्रविशेषणेति। न चैवं केवलत्वांशे विशेषणद्वयेनोभयदोषवारणमिति तदर्थ इति ब्रूमः। केचित्तु समा
नकालीनः समानाधिकरणश्चेत्। तथाभूतो यो दुःखप्रागभावस्तादृशसमानदेशत्वाभावमित्यर्थः। तेन तदुभयसमानदेशत्वाभावस्य
विशिष्टाभावत्वान्न व्यर्थविशेषणत्वं यथा घटवत्यपि घटपटोभयाभाव इति। अत एव नाप्रसिद्धिरपि प्रत्येकं प्रसिद्धेः। यथाव्याख्याते
नोपपत्तेः। स्वनाश्यो यः प्रागभावस्तदभावगर्भत्वमादाय प्रसिद्ध्युपपादनं व्यर्थविशेषणताभयेन तथाव्याख्यानादरस्तु स्वरूपकथनादिति वदन्ति तच्चिन्त्यम्।
परमेतदुक्तौ समानकालीनदुःखप्रागभावाप्रसिद्ध्या प्रत्येकमपि प्रसिद्ध्यसंभवात्। यदि च तदुभयसमानदेशो दुःखध्वंसोऽस्मदादीनां प्र
सिद्धस्तद्भिन्नदुःखध्वंसो मोक्ष इत्यभिमतं तदा किं दुःखादिगर्भकुसृष्टिव्याख्यानेन। न च व्यर्थविशेषणताभयेन तथाव्याख्यानादरस्त्व
स्वरूपकथनमिति वाच्यं कर्मधारयानुसरणे प्रत्येकं स्वनाश्यो यः प्रागभावगर्भतया प्रसिद्धेर्विशिष्टाभावतया व्यर्थविशेषणत्वाभावात् तस्य नावरूपकत्वा
त्। न च सुखानुभवस्याव्याप्तिः। तेन रागः सुखमस्तु त्वमिति श्रुतेर्मरणस्य दुःखाभावाभावसंभवात्। न च तत्सुखपूर्वकालीनदुःखध्वंस एव मु
क्तिः। तत्र चास्मत्कर्तृकाणामव्याप्तेः। तत्सुखज्ञानस्यापि दुःखतया तत्प्रागभावसमानदेशत्वात्। उक्तस्य सुखोत्पत्त्यसंभवाद् इति चेन्न तेन

कि॰व॰ राइत्यादि। ऋते स्वापेक्षयामरणोत्पदुःखमजइत्यत्रजात्यर्याप्तमचानुपपत्तिं विना न दुःखार्थत्याग इति वाच्यं। दुःखविशेषहेतुत्वव्ययवाद्रि
१५ पीउनसत्त्वे न दुःखोत्पादस्यावश्यकत्वात् न तु मरणे दुःखमेमाभूदिति कामनया अयाग स्यातो यत्र स्वर्गस्तत्र कामनातिरिति चेन्न नात्र कामनैव विशे
षितोद्देश्यथा यत्र स्वर्गो मम दुःखं भवत्विति कामनापत्तातस्तत्रकाग्गतिः न च दुःखे कामनैव नेति वाच्यं। इष्टसाधनताज्ञाने तत्संभवात्
न च यत्र योगिनां सकल दुःखमपभुज्य सुखं भुंक्तं तत्र कामनाव्याप्तिरिति वाच्यं। तत्रापि चारीरस्याग समये स्वर्गदुःखोत्पत्तेः न च भोजकादृष्टं विना
कथं दुःखोत्पत्तिरिति वाच्यं। अदृष्टीतरस्य भोगे नष्टीगान्येप्यवक्येपोत्यसाक्षान्मरणादुःखभोजकादृष्टस्य सत्त्वात्। न चैवमाधूरस्यापि क्षणात्या
गकाले दुःखापत्तिरिति वाच्यं। अदृष्टादिकारणाबोधे न बाधादिति दिक्। घातादिनया दाहज्वरादीति। तदेष्टापत्तिरिति। अरोगविशेषणेऽछि
त्तिर्मुक्तिरिति मतेने दंवोच्यं। सामान्यत इति। जान्यवेन जन्यज्ञानत्वावच्छिन्ने शरीरं हेतुर्न्नदसंसारकालीनजन्यज्ञानत्वावच्छिन्नेऽगोरखादिति भावः। न उ
बाह्मण्यायदक्षीत्यादेस्तस्यार्थ इत्यर्थे चतुर्थी साधुर्न चेहात्मनोऽर्थः किन्त्वात्मैव तस्यैवाधिपत्वादित्यत आह न चेति। सोऽर्थः तस्यार्थ इत्युनयत्रा रम॰
पि चतुर्थीदर्शनाञ्चोपपत्तिरिति भावः। न वदाहणपूर्यपोरभेदात्कर्तया। आत्मतन्त्रयोरभेद इति कथमेवमिति वाच्यं। अहे तवादिना परेणत १५

स्तुपगमात्रं अन्यथा शरीरूपयोरप्यवयवावयविभेदेनातथात्वापत्तिः ननु अभिन्नत्वमादाय मास्तु नाशः भिन्नत्वमादाय स्यादित्यत आह भेदे
ति। नित्येति। नित्यं यत्सुखं तस्याभिव्यक्तिरित्यर्थः मूले उज्ञानस्य कार्य्यत्वमिति निरोधइति भावः। ज्ञानमात्रे जन्यत्वानुमात्रो ननु नित्यसुखा
भिव्यक्तेः प्रामाणिकत्वे बाधादेवन सामान्यतः शरीरेहेतुता। किंतु तदर्थं शरीरभोगभावात्सह व्यतिरेकाशरीरध्वंसादि हेतुः कल्प्यत इतीत्य
त आह नवान्तत्रेति। नवा नित्ये सुखे मानमित्यर्थः। प्रत्यक्षेति। यद्यपि भेदमते ज्ञानेन प्रत्यक्षं तथापि स्वमतावष्टंभेदेनमुक्तं। तर्हि मुक्तेः काम
तिरित्यत आह आनंदमिति। आत्यंतिकेति। आत्यंतिकत्वमविनाशित्वमित्याहुः। तच्छिंत्य। तादृशदुःखप्रागभावस्य संसारदशायामपि
सत्वेनातिव्याप्त्यापन्ने तस्मात्समानाधिकरणयावद्धर्मध्वंससमानकालीनत्वं जन्यपावडुःखसाधनध्वंससमानकालीनत्वं वात्यंतिति
कत्वमित्याहुः। यद्यपि परैरतिरिक्ताभावो नाभ्युपेयते तथापि तदेकदेशिमतेनेदं उत्तरावधीति। अनागुत्तरावधि विद्युरसंसर्गाभाव
त्वेनेत्यर्थः सुक्तोरिति। मुक्तिरूपस्य प्रायश्चावस्येत्यर्थः। निरुपधीति। यदिष्टान्यार्थं तत्सोपधीच्छाविषयः। यथा चंदनादिकं। सुखार्थं
हि चंदनादीच्छा सत्या। अतस्तद्भिन्नं तु निरुपाधीच्छाविषयः। अन्यथेति। यदि सुखं दुःखत्वेन न काम्यं किंतु दुःखानवच्छिन्नसुखत्वेन तथा।

कि॰व॰ सुखं पुरुषार्थ एव न स्यात् । दुःखाननुविद्धसुखस्याप्रतीतेः स्वर्गसुखस्यापि सांतत्वेन दुःखशबलत्वादिति भावः । दुःखाभावस्यैवेति
१६ दुःखाद्युपघर्षो हि चेदमाद्यभावत्वेन पुरुषार्थत्वं न तत्र सुखापत्त्यापि तथा च मोक्षदशायां सुखाभावेऽपि मोक्षः पुरुषार्थ इति भावः । वै
परीत्येऽपि । सुखदशायां दुःखाभावोऽस्तीति तत्रापि व्यक्तुं शक्यत इति । अपुरुषार्थत्वमिति । इच्छाविषयत्वलक्षणपुरुषार्थत्वस्य बाध्यव
स्यापि तत्त्वेन तदभावस्य शंकितुमशक्यत्वात् । तर्हि हेतूच्छेद एव पुरुषार्थोऽस्त्वित्यत आह हेतुरपीति । यदितरत्वेति । यदितरस्योत्पत्स्यमा
नदुःखत्वे प्रमाणमस्ति तदाति नावश्यं दुःखमुत्पादनीयमिति तन्निवर्त्तनमशक्यमित्यर्थः । सदोष इति । निःफलः प्रयास इत्यर्थः ।
दुःखानुत्पादकत्वेन तन्निवृत्तेस्तु हेतुरूपत्वादिति भावः । उक्तरूपेति । समानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसत्वेनेत्य
र्थः । नन्वेवं मूलस्य का गतिरित्यत आह । तस्य च यथेति । यथाश्रुतेति हेतूच्छेद इति श्रुतेरित्यर्थः । सुखदुःखनिवृत्तिभ्यामिति तथा च सुख राम॰
दुःखाभावयोरेव स्वतः पुरुषार्थत्वं न तु दुःखसाधनध्वंसस्येति भावः । दुःखानिरूपितेति । यद्यपि दुःखनिवृत्तौ दुःखमेव प्रतियोगि न तु १६
तन्निरूपितः प्रतियोगी तथापि दुःखत्वनिरूपितेत्यर्थः । अत एव क्वाचित्कस्तथैव पाठ इति । दुःखहेतूनामिति । तथा च दुःखसाधनध्वंसत्वे नैव

पुरुषार्थत्वमितिभावः। दु॰खप्रागभावेतिसमानाधिकरणेतिवोध्यं। एतन्मते चरमदु॰खसत्वकालेपि मुक्तत्वे न दोषः॥ दु॰खं मे माभूदिति
तथा च दु॰खानुत्पाद एव स्वतः पुरुषार्थो न तु दु॰खसाधनध्वंसः॥ अन्यथा तस्येव मुख्यत उद्देश्यतास्यादिति भावः॥ किंतु पापांतराणीति।
।नन्वेवं कृतप्रायश्चित्तस्य काशीमृतस्य कथं मुक्तिः॥ न च तत्रापि दु॰न॰ पापांतरोत्पत्तिरिति वाच्यं काशीमरणेनोत्पन्नतत्त्वज्ञानस्य तस्य दोषा
भावेन तदुत्पत्तेरसंभवादिति चेत्। अत्र वदंति। तत्र दु॰खप्रागभावो नास्त्येव नहि तत्सत्वावरूपंभावे मानमस्ति। किंतु यत्र तत्सत्वं तत्र तथाभा(
वेन प्रायश्चित्तस्य हेतुत्वं तथा च तत्सद्भावसंदेहादेव प्रायश्चित्ते प्रवृत्त्युपपत्तेः यत्र प्रागभावाभावः तत्र प्रायश्चित्तस्याकिंचित्करत्वेपि न का(
विक्षतिः॥ न च नि॰फलत्वे तद्बोधकवेदाप्रामाण्यमिति वाच्यं। सति दु॰खप्रागभावे तस्य तथाजनकत्वमिति वेदतात्पर्यात्। सति दो
षे निषिद्धकर्मणः पापजनकत्ववत्सति विघ्ने मंगलस्य विघ्नध्वंसजनकत्ववत्। न च दु॰खप्रागभावसंशये कथं प्रवृत्तिरिति वाच्यं
फलसंशयस्याप्रवृत्तिविघटकत्वादिति। तच्चिंत्यं पापादिजनने दोषादेः सहकारित्वमिति तदभावे निषिद्धकर्मादेः सांगत्वाभावान्निष्फल
त्वेपि न तद्बोधकवेदाप्रमाण्यं। इह तु सांगस्य प्रायश्चित्तस्य निष्फलत्वे तद्बोधकवेदाप्रमाण्यस्यादेव। न हि दु॰खप्रागभावरूपे फले दु॰

17

कि॰ च॰ खप्रागभावरूपस्यापि सहकारित्वं येन तदभावे प्रायश्चित्तस्य सांगत्वं न स्यादिति। वयं तु ब्रूमः। तत्र दुःखप्रागभावो नाम दुःखकारीभूत
९ पापस्यैव तत्र मानत्वात् अप्रवृत्तिश्च तद्भूमात्रसंदेहात्। न चैवं तद्बोधकवेदप्रामाण्यमिति वाच्यं। यत्काम्यकर्तव्यतया हि वेदेन यद्बोध्यते
सांगस्य तस्यावश्यं तत्फलजनकत्वमिति नियमः। तदिह पापध्वंसकाम्यकर्तव्यतया प्रायश्चित्तस्य वेदेन बोधनात् तद्धेतुत्वादेः परं तु
द्बोधकवेदप्रामाण्यं न त्वात्र तदस्ति। तत्रापि प्रायश्चित्तेन पापस्य नाशितत्वात्। न हि दुःखप्रागभावमपेक्ष्य प्रायश्चित्तेन तद्ध्वंसो जन्यते
येन तदभावे तस्य तज्जनकत्वं न स्यात्। अत एव प्रायश्चित्ते पापध्वंसकामेनैवाधिकारः। न तु दुःखानुत्पादकामना तस्यातत्फलत्वात्।
न चैवं दुःखानुत्पादस्यैव प्रयोजनत्वादित्यादि यथा विरोधः प्रायश्चित्तादिस्थले दुःखसाधनध्वंस एव स्वतः पुरुषार्थ इति संचमोदाति
पूर्वपक्षे तत्र दुःखानुत्पाद एव स्वतः पुरुषार्थः तथा च तत्साधनतया पापध्वंसस्य तत्र गौणमेव प्रयोजनत्वं न स्वतः प्रयोजनमिति समनमोदह
तिहितदर्थी। न दिस्तु कंतस्यैव दुःखानुत्पादस्य सत्वेन पुरुषार्थत्वादिति। तथा च प्रायश्चित्तस्य पापध्वंसः फलं तत्फलं च स्वतः पु राम॰
रुषार्थो दुःखानुत्पादः न च परमपुरुषार्थो निष्पन्नो वेदबोधितफलं जनयतोऽपि न फलत्वं। तथात्वे विघ्नध्वंसस्य समाप्तिं वा जनि १७

तवतोपिमंगलस्यतत्साध्यत्वतःपुरुषार्थसुखाद्यनुत्पत्तौनिष्फलत्वापत्तेः।तस्मात्प्रागभावाऽसत्वेपितन्ननिष्फलमितिनतद्बो
धकवेदप्रामाण्यमिति।यत्तुतत्रापिदुःखप्रागभावोस्त्येवतथाचतस्यननिष्फलत्वंप्रागभावस्यचानन्यगत्याऽनियतदेशत्वक
ल्पनादात्मांतरेपापूत्तरमासाद्यतेनदुःखोत्पादनं।नचैवंदुःखप्रागभावसत्वेकाशीमृतस्यकथंमुक्तिरितिवाच्यं।स्वसमवेतदुः
खजनकप्रागभावस्यैवमुक्तिविरोधित्वादिति।तन्नाप्रागभावप्रतियोग्यसमानदेशत्वंप्रायश्चित्तेप्रवृत्त्यन्यथानुपपत्त्याकल्प
नीयंमानांतराद्वा।नाद्यःउक्तन्यायात्तदन्यथोपपत्तेः।नांत्यः।तदसिद्धेः।अतएवप्रागभावध्वंसयोःप्रतियोगिसमानदेशत्व
मितिसिद्धांतइति।अफलमिति।स्वतःपुरुषार्थोपधायोजकमित्यर्थः।संस्कारनाशकत्वादिति।ज्ञानजन्यकालांतरभाविफ
लानुकूलव्यापारनाशकत्वादित्यर्थः।नतुभावनानाशकत्वादितिविवक्षितं।भावनायाःस्मृत्युनाश्यत्वात्।अन्यथास्मृतेर्भा
वनाऽजनकत्वेस्मृत्यंतरानुत्पत्त्यापत्तेः।भावनाजनकत्वेवाअभ्यासेनस्मृतिदार्ढ्यानुपपत्तेरितिवदंति।स्मृतेरभावादितिक्व
चिदभावादिपाठोनास्ति।तत्रस्मृतेःप्रसंगादितिशेषः।यद्वातत्वज्ञानेसतीत्यकारप्रश्लेषइति।वासनायाएवेति।नत्वभा

भावा

कि० द० सत्त्वापि मिथ्याज्ञानमुत्पाद्य प्रवृत्तिद्वारा दुःखजनकत्वे विरोधिनी न स्यात्। तथा च मिथ्याज्ञानप्रागभावे तदसंभवात्तत्सत्त्वेपि न हानिरिति तन्नि
१८ वृत्त्यर्थं किं तत्त्वज्ञानेन। न च तत्सत्त्वे दोषविशेषगुणोच्छेदलक्षणो न मोक्ष इति वाच्यं। चरमसंस्कारवत्तस्या अपि कालादिना नाशसंभवा
दिति चेन्न। एवं अन्वयव्यतिरेकाभ्यां चरमदुःखध्वंसं प्रति तत्त्वज्ञानस्य हेतुत्वमित्याकर एव वृत्तायुक्तत्वात्। तत्त्वज्ञानं विना काय
व्यूहाद्युत्पन्नानंतकर्मक्षयानुपपत्तेश्च तत्त्वज्ञानस्यावश्यकत्वे पूर्वोत्पन्नमिथ्याज्ञानवासनाभिः तेनैव निवर्त्यते। तत्त्वज्ञाने सती(
त्याविनानुपपद्यंत इत्यविरोधस्य व्यवस्थापितत्वादिति भावः॥ इदानीमपीति। नव्यास्तु अपि पक्षसमत्वादनेन प्रकृतानुमाने किं दूष
णमिति चेन्न। उच्छिद्यत इति वर्तमानत्वाभिप्रायेण बाधे तात्पर्यादित्येके। अन्ये तु दुःखप्रागभावासहवृत्तिदुःखध्वंसप्रतियोगित्व
मत्र साध्यार्थस्तथा चेदानीं तन्न दुःखधारासु व्यभिचारादित्याहुः॥ इदानीमपि दुःखधारादर्शनादत्यंतमुच्छिद्यत इति बाधितं। इय
ता कालेन यतो नाभूदित्यपि वदंति। तेनाप्रमात्मेति। यद्यप्येवं सर्वमुक्तिर्नायाति तथाप्येवमेव पक्षत्वे साध्यमिति नाप्रसिद्धिरिति भावः॥ राम०
व्यधिकरणदुःखप्रागभावकालीनत्वादेर्जन्यदुःखस्य बाधः उत्पन्नदुःखं पक्षयत्येतत्पदं तत एतदीयसंयोगादिप्रागभावकालीनत्वाद्बाधः १८

त्यत उक्तमाद्यं ड४खपदं। एतड्डखस्यैतड४खसमानकालीनान्यत्वाभावाद्बाध इत्यत उक्तं प्रागभावेति। ननु दृष्टांतासिद्धिरन्यात्म
ड४खस्यैतड४खप्रागभावसमानकालीनत्वादित्यत उक्तं द्वितीयेतत्पदं। एतड्डखमेतत्संबंधिड४खं तत्र च ड४खपदं स्पष्टा
र्थमेव। तृतीयड४खपदं ड४खध्वंसस्यैव धुनित्यमिति तादृूप्यसिद्धये। प्रागभावकालीने तड४खान्यत्वं ड४खविशेषणं वोध्यं।
यद्यपि ड४खपदमाकरे नास्ति तथापि वङ्कबीत्युद्धरोधेन ड४खपदमध्याहृत्य हेतुमाह ड४खसंततित्वादिति। वङ्कबीहीति। यद्य
पि ड४खस्य संततिर्यत्रेति वङ्कबीहिणापि ड४खसंतत्याश्रयत्वादिति हेत्वर्थ४ पर्यवस्यति न च (नित्यज्ञानाश्रयत्वादिति ज्ञानि
त्यज्ञानादिवाचकपदाभावाद्यथाप्यनयो४ समनियमाद(स्यापि प्रकृतसाध्यव्याप्यत्वादेव मुक्तौ अनित्यज्ञानादिवाच
कं च्यात्मत्वस्येति। समव्याप्तोपाधिपक्षे घटादौ व्यभिचारादात्मत्वं विशेषणं अत एव न पक्षेतरत्वमपीति भाव४। ईश्वरानङ्गी
कर्तृमतेनेदं। ननु पक्षेतरत्वमेतत्स्यादित्यत आह व्याधिकरणेति। पक्षोपन्यास इति शेष४। हेतूपन्यासेऽथ यदि ड४खपदा
ध्याहारस्तदा सदोषो यद्विचयथाश्रुतस्यैव तत्र तात्पर्यं। तत्राह। संततित्वादिति। यद्यपि व्याधिकरणावङ्कबीहिरपीष्टस्तत एव तथा

19

कि॰व॰ १९

पितत्राध्याहारापत्तिरेवदोषइतिभावः॥ यद्यपि सिद्धांतेपि लक्षणाद्यापत्तिरेव न तथाप्यापाततइदमुक्तं। वस्तुतस्तु घटत्येकमेवं साध्य
त्वेपुरुषात्सुपर्यवसानान सर्वमुक्तिसिद्धिः॥ सिद्धांते त्वेकैदेव सर्वमुक्तिसिद्धिरिति हृदयं। वाधइतिसाध्याप्रसिद्धिरितिभावः॥ अ
त्मेति। आकाशादिनिष्ठध्वंसप्रतियोगिदुःखत्वेनार्थांतरवारकत्वाय स्मारणायाह त्यंतं पक्षविशेषणं। आत्मेत्युपलक्षणं शरीरत्व
द्वेषवादयोपि वोद्ध्याः॥ कालेत्युपलक्षणं। तदुपाधिरिकृत तदुपाधयोपि वोध्याः तेन दिगादिवृत्तितया ध्वंसपक्षविशेष
णासिद्धिः॥ दुःखप्रागभावानधिकरणत्वेच दुःखप्रागभावाधिकरणभिन्नकालं ध्वंसकाद्यात्मनः। तथाच घटत्येकदुःखा
नार्थांतरं तथाच पक्षधर्मता वलात् दुःखप्रागभावाधिकरणभिन्नकालवृत्तिध्वंसप्रतियोगिदुःखमायातीति दुःखप्राग
वासमानकालीनदुःखध्वंसरूपा सर्वमुक्तिः सिध्यति। नच कालस्येकत्वे कथं तद्भिन्नत्वमितिवाच्यं। तदुपाधेस्तथात्वात्। दुःख
पदव्यासियहार्थं अन्यथा दृष्टांतस्य साध्यवैकल्यापत्तिः। तादृशं कालमनाद्याय तादृशोदिशोप्यसिद्धेर्न तदर्थांतरं। कार्येति रा॰म॰ १९
मात्रपक्षमनंतत्वे व्यभिचारवारणाय। नचैवमपि ध्वंसत्वे व्यभिचारः॥ भाव इत्तित्वे सतीति हेतुविशेषणात्। नच कालादिनिष्ठध्व

त्वात्कार्यमात्रवृत्तित्वमसिद्धं। असाधारणादृष्टजन्येविहितत्वाच्च अन्ये तु अनन्तादृष्टाश्रयाजन्यत्वेसाध्ये सिसाधयिषितमुक्तिसिद्धेः। स
मानाधिकरणदुःखप्रागभावासहवृत्तिदुःखध्वंसरूपायाश्च स्यादुक्तानुमानादसिद्धेः। नहि मुक्तिपदार्थस्वरूपासिद्धिं विनाऽ
नुमितिस्थितं तथा च समानाधिकरणदुःखप्रागभावासहवृत्तिध्वंसप्रतियोगिदुःखवृत्तित्वं साध्यं। न च तावदपि साध्यं प्रत्येक
सुखार्थातिशयत्वात्सर्वमुक्तस्य सिद्ध्यापत्तेः॥ किं तु तादृशध्वंसप्रतियोगिमात्रवृत्तित्वं। तथा दुःखत्वमेपक्षादावनैकांतिकवारणा
यमात्रपदं। एतन्मते च कार्यपदं ध्वंसावच्छिन्नसत्ताप्रतियोगिपरं तेन ध्वंसत्वेन व्यभिचार इत्याहुः। तच्चिन्त्यं उक्तागत्या पक्षधर्मतावले
न यथाश्रुत एव सर्वमुक्तिसिद्धा च पदार्थकल्पनानुपपत्तेः। उक्तगत्येव मात्रपदसार्थकत्वाच्च। न च मुक्तिपदार्थस्वरूपं नातः
सिध्यतीति वाच्यं। दुःखप्रागभावासमानकालीनदुःखध्वंसस्य सर्वमुक्तित्वे बाधकाभावादिति। यत्तु ध्वंसप्रतियोगितावच्छे
दकत्वं साध्यं तथा च दुःखत्वादावनैकान्तिकवारणाय हेतौ मात्रपदमिति। तन्न। ध्वंसस्य सामान्याभावत्वानङ्गीकारात्तदङ्गी
कारे तावतैव सर्वमुक्तिसिद्धिसंभवे ध्वंसपूर्वविशेषणवैयर्थ्यापत्तेरिति। चैत्रेति चैत्रदुःखत्वं चैत्रदुःखप्रागभावानधिकरण

कि·भ· २०

धिकरणध्वंसप्रतियोगीवृत्तिकार्यमात्रवृत्तित्वादितिभावः। चेन्नकालान्यैति। पक्षविशेषणस्यार्थःप्रयोजनंचपूर्ववद्ध्वंसत्वादि
ति। जन्यभावत्वादित्यर्थः। चेन्नवृत्तावितिः। यद्यपिसंयोगेपिसाध्याव्याप्तिर्भवत्येवातथापिध्वंसत्वरूपसाधनावच्छिन्नसाध्यव्या
पकत्वाभिधानेतदुद्धारः। स्यादित्यादिनाध्वंसपर्यंतमुक्तंनवदुःखध्वंसत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादोषइतिवाच्यं।
वक्ष्यमाणामरूपविपक्षबाधकेनहेतोः। साध्यव्याप्यतयातद्व्यापकत्वेनोपाधेःसाध्याव्यापकत्वादितिभावः। पक्षेतरत्वादितिप
क्षेतरउत्पत्त्वादित्यर्थः। पक्षान्यज्ञानेतरपिव्यावर्त्तनाह। वक्षतोवक्ष्यमाणविपक्षबाधकेनहेतोःसाध्यव्याप्यत्वादनुपाधित्वमितिभा
वः। कालादिवृत्तितयासाध्याव्यापकत्वमपीत्याह। नत्वेवमप्यशेषविशेषगुणोच्छित्तिरूपाउक्तिर्नोपयातीत्यतआह। एवमिति। तेनेति। च
रमज्ञानभिन्नत्वेनसकलविशेषगुणायमित्याह। भोगस्येति। नचध्वंसएवतत्प्रयोजनमितिवाच्यं। यदुद्देशेननपुरुषःप्रवर्ततेतस्यैव
प्रयोजनत्वात्। नत्वकेवलमप्यदृष्टजन्यत्वंमुक्तौव्यभिचारीत्यतआहयुक्तौचेति। यद्यपिमुक्तिरदृष्टजन्यैतिसाज्ञानवत्प्रतितथापिप्र राम·
तियोगित्वेनतद्ध्वंसात्मकमुक्तौजनकत्वमित्यर्थात्तदभिधानमितिभावः। क्वचिददृष्टाजन्यत्वेस्पतीतिपाठःतत्रभोगजात्साधनएवभोग २०

कादृष्टजन्यत्वनियमइतिमुक्तेरदृष्टाजन्यत्वंवक्ष्यतीत्यर्थः॥सिद्धेर्वेति॥सर्वमुक्त्यभावसिद्धेर्वेत्यर्थः॥संसारिवेनेति॥रख्यादि
शरीरावच्छेदेदशायांस्वरूपयोग्यतासत्वेपिनमुक्तिः॥श्रवणादिसहकार्यभावादितिभावः॥श्रमादिमतेनखक्तिस्वरूपयोग्यताम
सुपेत्याहश्रमादेरपीति॥दोषांतरमाह॥श्रमादेरितिनचविपर्ययतोऽनुतद्रूपश्चयरूपत्वाविरोधइतिवाच्यंतत्रप्रकारभेदेनतथा
त्वादित्युक्तदशाभावात्॥अन्येवेतदस्वरसेनाहअन्यमायेति॥वस्तुतस्तुप्रागभावस्यप्रतियोगिजनकत्वनियमेनानंतत्वाभावात्॥अन्ये
वेतदस्वरसेनाऽनन्तत्वात्मनिष्ठप्रागभावेःप्रतियोगिजनत्वेसर्वमुक्तिरावश्यकीप्रागभावात्यत्वेश्रीघ्रंमुक्तिः॥तदुक्तं
विरोधीतिविशेषइतिभावः॥कालत्वमिति॥कालोपाधित्वमित्यर्थः॥नचदृष्टद्रव्यातिरिक्तद्रव्यत्वंतथाचैव्याप्यमित्यत्रदैशिको
व्याप्तिविवक्षायांसिद्धसाधनं॥कालोपाधित्वमित्यकव्याप्तिविवक्षायांधर्मत्वादित्यस्यैवसार्थकत्वेऽधिकवैयर्थ्यतापत्तेरिति॥के
चित्तुकालत्वमित्यनेनकालमात्रवृत्तिधर्मउक्तः॥कालपदंचकालतदुपाधिसाधारणंधेयंएवंचदैशिकव्याप्यभावपिनासिद्ध
साधनमित्याहुः॥कालत्वसमानाधिकरणेति॥नचकालेपिकालत्वात्यंताभावसत्वात्साधनव्यापकत्वमितिवेन्नाइदानींका

कि॰व॰
२१

लत्वात्यंताभावइतिप्रतीतावपिकालेकालत्वंनेतिनप्रतीतिः।तथाचध्वंसत्वेस्वरूपकृएवंचप्रतियोगिध्वंसविरोधविरोधित्वम्
कालत्वाधिकरणेवर्ततेयोत्यंताभावःतत्प्रतियोगित्वरूपाधिरित्यर्थः।इत्यादृश्यनत्वेति।चरमदुःखेनदृष्टंचरमदुःखंचादृष्टेनना
श्यतइत्यन्योन्याश्रयत्वाकत्वाभिप्रायेणासुंदोपसुंदन्यायइत्यर्थः।तस्यापीति।अदृष्टनाश्यस्यापीत्यर्थः।ननुतस्यतदंतर्भूतत्वेपिप्र
तियोगितयातत्रतज्जन्यत्वमविरुद्धमेवेत्याहचरमेति।अदृष्टस्यफलनाश्यतया।दृष्टनाश्यस्यसर्वस्यैवफलहेतुत्वेनयोगपद्यं
।नवादुःखस्यादृष्टनाश्यकत्वंभोगनाश्यत्वादित्यर्थः।भोगेति।यद्यपिप्रतियोगितयाभोगजनकादृष्टमेवजनकमित्यव्यभिचारात्त
द्वत्स्यं।तथापितद्वारेणरूपेणादृष्टजन्यत्वमुत्पत्तिमन्मात्रमितिमतनिराकरणेतात्पर्यं।केवलेति।ननुदुःखसंततिरत्यंतोच्छि
न्नाऽनादित्वादित्यत्राशाद्यदृष्टांतेनान्वयव्यतिरेकिसंभवेकिंकेवलव्यतिरेक्युपन्यासेनेतिचेद्।अत्रवदंति।आत्यंतिकोच्छेदपदेन
समानजातीयप्रागभावसमानकालध्वंसप्रतियोगित्वंविवक्षितंतस्यैवसजातीयप्रागभावासमानकालध्वंसप्रतियोगित्वरूपात्यंतो राम॰
च्छेदसाध्यविरोधित्वात्।तस्यवाक्याद्योनित्येऽसंभवेनान्यत्रसाध्यस्याप्रसिद्धत्वेनान्वयव्यतिरेकिचाभावइति।समस्तमानना २१

द्वित्वेनसममव्ययाग्रहादुक्तदोक्तानित्यर्थः। आदिमत्वंचेति। एतत्प्रदीपसंतानेऽत्यंतोच्छेदः। आदिमत्वंचेतिसाध्यव्यापकत्वमितिभा
वः। नत्वनादित्वंप्रागभावाप्रतियोगित्वंपक्षेऽसिद्धमित्यतआह। अनादित्वंहीति। येनरूपेणानादिनातत्त्वपदेनविवक्षितंत
दाश्रयध्वंसव्याप्येयः प्रागभावः तत्प्रतियोगिमात्रवृत्तिजातिमत्त्वमित्यर्थः। ननुव्याप्तिर्दैशिकीकालिकीवानाद्यः। यत्रघ
टः समवायिनाशान्नष्टः तत्रघटप्रागभावस्यघटध्वंसाव्याप्यतयाघटसंतानेऽव्याप्तेः। नांत्यः। मात्रेत्यादिनिरर्थकत्वापत्तेः। अ
तएवकुसुमांजलौतथैवानादित्वमुक्तमितिचेत्। अत्रवदंति। यद्यप्रागभावस्तदातज्जातीयध्वंसइत्येवंरूपाकालगर्भैवव्याप्तिश्च
भिमताव्याप्यत्वंचसमानकालीनत्वमात्रपरंनतुनियमपर्यंतपरंतद्धिप्रवर्तनीयस्याभिममात्रपदादेवव्याहन्तेः। नचदैशिकीवाकिंचि
यं त्करमितिवाच्यं। अप्रत्यंतानुच्छेदात्मकसाध्यस्यपूर्वविवक्षितस्याकारोऽभावेनइव्यवस्थादायोक्तानादित्वस्यतत्रसत्त्वादैकांतिकता
पत्तेः ध्वंसप्रागभावयोश्चानित्यसंसर्गाभावमात्रकारणत्वसाधेदेवदत्तप्रभवत्वादिजातिमत्तितत्प्रागभावसमानकालीनप्रागभावप्र
तियोगिमात्रवृत्तिजातिमत्तिग्राह्यवतिव्याप्तिः। नचैवमपिजातिग्रहणमनर्थकमितिवाच्यं। सर्वमुक्तिमात्रेविवादेनप्रत्येकमुक्तत्वर्म्यु

22

कि·भ· पगमाद्युक्तकडठस्वस्यापीष्टत्वात्तेन समानजातीयप्रागभाववत्समानकालध्वंसप्रतियोगित्वरूपसाध्याभावेन व्यभिचारितया तद्धारकत्व
२२ श। न हि तन्मात्रवृत्तिर्जातिरप्रसिद्धानिमित्तप्रयोज्याया डठस्वत्वावान्तरजातेरात्मविशेषनियतडठस्वमात्रवृत्तित्वासंभवात् उत्पन्ननिमि
त्तइतिनाप्तात्मनिता द्दडठस्वसंभवात्। न च घटकडठस्वेपि स्याध्यभवेतिवाच्यं। समानकालीनत्वविशिष्टसंगर्भत्वात्तस्य। यद्यु
तद्गर्भत्वेपि चरमघटकडठस्वनेव्यभिचार इति किं तदर्नतिप्रयोजि। तन्न। तावन्मात्रे ध्वंसादित्वाभावेन हेत्वभावात्। यावत्प्रक्तानादित्व
विश्रामस्थावत्तिप्रसक्तासाध्यमिति विवक्षितत्वाद्यथा डठस्वत्वमात्रायघटकडठस्वे प्रकृतमनादित्वमिति तद्दोषतादवस्थ्यापत्ति
।अत एव स्वाश्रयध्वंसव्याप्यप्रागभावप्रतियोगित्वादित्येव हेतुरस्त्वितीयपास्तं। घटकडठस्वे व्यभिचारात्। अत एव कुसुमांजलिप्र
काशेप्युक्ता शुद्धेद्व्याप्यानादित्वनिर्वचनमुद्देश्यपंयेनाशेवत्तत्त्वाप्तितद्विशेषणाप्रक्षेपः। किंचानादित्वमात्रलक्षणमेवातएव
प्रमेयइत्यादिसाध्यस्यापि तत्र लक्ष्यत्वेपवेति। केचित्तु अदृष्टप्रयोज्यजातिमाद्यघटकडठस्वे व्यभिचाराभावेपि घटकात्मरूपकार राम·
णप्रयोज्यजातिमाद्यघटकडठस्वज्ञानादौ व्यभिचारतादवस्थ्यमेवेति। न च तज्जातौ मानाभावः घटकात्मजन्यैतत्रजन्यतावच्छेदक २२

द्धौ व्येतस्य बाधकाभावेन लाघवेन च जातित्वात् । अन्यथा व्यक्तापि कारणप्रयोज्यतातिमात्रविलयापत्तिः । न च स्वरूपकोपाधेरेव तद्
वच्छेदकत्वसंभवात् । सामान्यसामग्रीत एव तत्संभवेऽपि विशेषसंग्रतिविशेषस्य हेतुत्वात् । यत्सामान्ये यत्सामान्यमिति व्याप्तेः । न
ज्ञातिसंदेहेऽपि संदिग्धानैकान्तिकस्य दुःपरिहरत्वात् । न चादृष्टप्रयोज्यजात्या संकरान्न तज्जातिमत्त्वमिति वाच्यं । अदृष्टप्रयोज्यजा
तेर्नानात्वेनाप्युपपत्तेः । अन्यथा गत्वादिजातिविलयापत्तेः । यद्विचाक्षुगतमत्वादिना गत्वादिजातिसिद्धौ तादृशवादेरनन्यगत्वान
नात्वं तदा जन्यतावच्छेदकं तया तज्जातिसिद्धौ तन्नानात्वमिति तुल्यं । तस्माद्येन रूपेण नादित्वं तत्तद्भावप्रयोजकधर्मगर्भत्वमेवं चोक्ताका
र्यव्यभिचारवारणाय मात्रपदं जातिपदं च धर्ममात्रपरमेव प्रत्येकमुक्तेरप्यनभ्युपगमदशायां विशेषादर्शनदशायां वा सत्त्व
तिपक्षइति । छकडः खादेन व्यभिचारो दोषायेत्याहुः । मूलेतीति । अनवच्छेद्यमूलत्वमुपाधिरित्यर्थः । न वाकाशादौ साध्याव्या ध्या
प्तिः । तन्मूलाघसिद्धेरिति चेत् । न । पूर्वं विवक्षितस्य साध्यस्य तत्राभावादित्येके । उच्छन्नमूलभिन्नत्वमुपाधिः । सचाकाशेऽप्ये
वेत्यन्ये । उपाधिव्यपदेशं दूषयति । नापीति । प्रागभाव इति । एतद्यथाश्रुते साध्ये बोध्यं । विवक्षितसाध्यस्य तत्राभावात् । न

९३

त्रि॰म॰ २३

पीति। नन्वत्र यथाश्रुते प्रागभाव एव साध्याप्रसिद्धः तद्धाश्रयविशिष्टेतसाध्याभिप्रायेणोद्देश्यावत्त्वपक्षधर्मावच्छिन्नसाधनव्याप
कत्वाभिप्रायेण वा। तर्कपूर्वक एवोपाधिरस्तीति व्यर्थविशेषणत्वमित्याह प्रागभावेति। सोपि नोपाधिः। साधनव्यापकत्वादिति भावः
।उपाधेरिति। यदि साध्यव्यापकत्वमिति पाठस्तदा तुच्छेद्यमूलत्वोपाधेरित्यर्थः। यद्वि च साध्याव्यापकत्वेति पाठस्तदा साध्योपाधेरित्य
र्थः। तेनेति। ननु खंडप्रलयकालमादाय व्यर्थासिद्धिरिति चेन्न। नायं कुकार्यं तावद्धंसनात्। कतिपयकालावच्छेदेनात्यंतार्थबोध
यातिप्रसंगवारणाय मात्रपदं। न तु घ्राणत्वजातिमादाय घ्राणेन्द्रियातिव्याप्तिरिति चेन्न। आत्मनो गुणाविशेषइति। स्वकार्यत्याआत्म
विशेषगुणपदेन स्मृतेरुक्तत्वात् स्मृतिजनकमनःसंयोगवत्त्वं ज्ञानानामिति नोक्तदोषः॥ न चैवं स्रुतिमनःपदं व्यर्थं न च स्मृतिहेतुशरीर राम ६९
जातसंयोगमादाय घ्राणातिव्याप्तेस्तद्वारणाय तदुक्तेनैवान्यथासिद्धतया ज्ञातमनोयोगस्याहेतुत्वान्न दोषतादवस्थ्यमिति वाच्यं

त्यावयविपदेनैव तद्वारणात्। न च प्राणोप्यंत्यावयवीति वाच्यं। प्राणे घ्राणेघ्यात्मिकवायुरंत्यावयविपदेनैव निरस्त इति प्रमेयनिबंधविरोधात्।
तस्माद्यत्र स्मरणाविशेषोद्देशे नांत्यावयविस्तु वर्णघटादिकं जलेनोत्पद्यते तत्र सुवर्णघटादिजलयोः संयोगः स्मृतिकारणं तदात्म
प्रयत्नघटत्वादिकमादाय प्रतिव्याप्तिस्तद्वारणाय तदिति केचित्। अन्ये तु आत्मविशेषगुणत्वावच्छिन्नकार्यता प्रतियोगिककारणताश्र
यत्वं विवक्षितमिति न घ्राणेन्द्रियातिव्याप्तिः। अत एव विशेषपदमपि सार्थकं। आत्मगुणत्वस्य नित्यानित्यवृत्तितया कार्यतानव
च्छेदकत्वेन तदवच्छिन्नकार्यताया अप्रसिद्धेः। आत्मपदं च संसार्यात्मपरमिति न दोषः। तत्रस्थां मनः पदं च प्राणातिव्याप्तिवारक
मेव प्रमेयनिबंधश्च मतांतरेणेत्याहुः। न च शरीरत्वस्य लक्षणतया प्राकृतप्रमितौ कथं शरीरमनोयोगत्वेन हेतुत्वग्रहः तद्ग्रहे च
कथं मुक्तलक्षणप्रसिद्धिरिति वाच्यं। शरीरसंयोगस्य भोगायतनसंयोगत्वेन हेतुत्वग्रहात्। भोगायतनत्वं भोगावच्छेदकत्वं शरीर
तदवयवसाधारणं। ननु नृसिंहहयग्रीवादेः शरीरे व्याप्तिस्तत्र नरत्वसिंहत्वादेर्जातिसंकरभयेनानंगीकारादिति चेत्। न। तत्रा
पि चरमाविभिन्नशरीरवृत्तिचेतनत्वादिजातिवज्जातिविशेषसंभवात्। विजातीयपदस्य तथात्वेऽपि हानुपपत्त्या विजातीयत्वजातिस्वीकारावाद्

कि॰भ॰ स्वस्वभूतावेशन्यायेनास्मदादिशरीरमेव परिच्छिनत्तीति तच्छरीरमनोयोगस्य तद्विशेषगुणाजनकतया तत्राव्याप्तिरिति दूषणं निरस्तं
७० बोध्यं। तेनाप्यस्मदादिविशेषगुणाजननाच्छ्रन्नब्रह्मणा या॥ इतिमात्त्वश्रवणात्तच्छन्निदृतिमाद्यमादायातिव्याप्तिरिति चेद्योन। काष्ठ
वन्हिनो संकरेण तज्जातित्वासिद्धेः नानात्वे च मानाभावात्। पाषाणादावस्थायामात्मविशेषगुणाभावेन तत्कारणमनःसंयोगव
द्वन्निद्वाभावाच्चयद्रूपं तीनचमदादिति विशेषणे नैवतन्निरासः। सदित्यस्य वस्तुतः शरीरसंयोगोत्यर्थः शरीरसंयोगी त्वेनैव जनकत्वमि
तिचार्थः। आद्ये कालाद्यतिव्याप्तिः स्पष्टत्वस्यैव। अंत्ये सिद्धिर्घ्राणादावाहिनैव जनकत्वाद्व्यवस्थापनाणातिव्याप्तिर्दुः परिहरत्वादिति। स्पष्टत्यजन
केति। अजनकत्वस्वरूपायोग्यत्वादितेनःक्ष भवमात्रजनकमनःसंयोगाविशेषमादायघनात्मादावतिव्याप्तिः। न चैवं मनस्यव्याप्तिः। स्पष्टा
योग्यश्चक्षुर्मनःसंयोगादिकमादाय तत्रोक्तलक्षणसत्वात्। स्पष्टत्यजनकत्वेतितादृशसंयोगान्नयत्वमित्यर्थ इत्यन्ये। घटादावतिव्या
प्तेरात्मज्ञानकारणेति। चक्षुर्घटसंयोगमादाय घटेतिव्याप्तिरिति मनःपदं ज्ञानपदं च धमापरत्वे नस्यन्नूवहनाडीमनःसंयोगस्यस्व राम॰
प्नात्मज्ञानजनकतया नाद्यं नातिव्याप्तिः। न चेन्द्रियत्वेज्ञाते तन्मनोयोगत्वेनकारणत्वग्रहस्मन्नयहेतिविन्द्रियज्ञानमित्यन्योन्या ७०

नया च द्धर्मनोयोगत्वादिनापि तद्धारा सर्वज्ञानाजनकत्वादिति एवं च तत्र मनोयोगस्यापि तथात्वान्नतत्राव्याप्तिः। नहि संयोगिनोः जनक
त्वे संयोगजनत्वात्तच्चः सर्वज्ञानजनकत्वमिति वमतां तरमिति भावः। सर्वज्ञानजनकत्वादिति पाठे त्वच स्तथात्वं नन्तु तन्मनोयोगस्ये
ति मन्व्याप्तिरित्यर्थः। शब्देति। शरीरादाववतिव्याप्तेराह सत्यंते। स्रोत्राव्याप्तेराह शब्देतरेति। घ्राणाद्यव्याप्तेराह उद्भूतेति। उद्भूतत्व
साक्षात्कारप्रतिबंधकतावच्छेदकानुद्भूतत्वजात्यभावसमूहः स च चक्षुरादिसामान्यगुणापीति तदव्याप्तेराह विशेषेति। न च तस्य
प्रत्यक्षत्वात्तदनुद्भूतत्वमिति वाच्यं। सामान्यगुणस्याश्रयायोग्यत्वेवाप्रत्यक्षतया तत्र साक्षात्कारप्रतिबंधकतावच्छेदकानुद्भूत
त्वेमानाभावात्। केचित्तु उद्भूतपदं प्रत्यक्षविषयपरं विशेषपदं लौकिकपरं तेन शब्देतरलौकिकप्रत्यक्षविषयगुणानाश्रयत्वे सतीत्य
र्थ इत्याहुः। सत्यंतमात्रं दिगादावतिव्याप्तमिति ज्ञानकरणेति। न च मनःपदस्वैयर्थ्यं इंद्रियावयवार्थसंयोगस्यापि ज्ञा। न हेतुत्वा
दिंद्रियावयवेतिव्याप्तिवारकं वाच्यं। प्राणवायोरनुद्भूतस्पर्श इति मते तत्रातिव्याप्तिवारणाय तत्त्वं। प्राणमनोयोगस्य शरीर
प्राणसंयोगे मान्यथासिद्धतया ज्ञानाजनकत्वादित्यन्ये। ननु शब्देतरविशेषणमव्याप्तिवारकत्वादितरदनुमानेनागसिद्धिव।

वि॰भ॰ ७१ रकमतो व्याप्तिग्रहानौपयिकतयाप्यर्थं। नच व्यतिरेके व्याप्तिग्रह इति लक्षणाभावस्य विशिष्टाभाववत्तया व्यापकतया च न तत्र वैयर्थ्यमिति
वाच्यं। अव्यावर्त्तकस्य विशेषणस्याप्येवमवैयर्थ्यापत्तेः। नीलधूमस्यापि व्यतिरेकितया गमकत्वापाताच्च। न चान्वये व्याप्यत्वासि
द्धा व्यतिरेकेऽपि तत्र तदनुमानाभिति वाच्यं। प्रकृतेऽपि तुल्यत्वात्। अथान्वयेऽपि न व्याप्यत्वासिद्धिः। अव्यभिचारकविशेषणस्य
विशिष्टाभावप्रतियोगिविशेषणत्वनियमात्। अन्यथा तद्धारकत्वानुपपत्तेः। नहि भवति यत्र विशेष्यमव्याप्तं तत्र विशिष्टस्य
व्याप्तिः। विशिष्टाभावसंपादकतया तु तथात्वमिति चेत्। अस्तु तावदेवं। तथापि यत्र विशेष्यमेवाव्यभिचारकं तत्र का गतिः। गंधव
त्तायाः पृथिवीलक्षणत्वे योग्यतायाः अव्यभिचारवारकत्वादिति। अत्राहुः। इतरभेदानुमानं द्विविधं एकं लक्षणमयपक्ष
कं प्रसिद्धभेदहितीयं चेतरे। तरवान्निष्ठभेदप्रतियोगिनः लक्षणशून्यत्वादित्यादि। तथा च यत्र द्वितीयेन तदनुमानं तत्राग्रे
तरपदं। अत्रैव व्यभिचारवारकमेव। न चैवमतिव्याप्तिवारकविशेषणस्यैव भागासिद्धिवारकतया व्यर्थत्वापत्तिः। न च तत्र प्र रा॰म॰
सिद्धकल्पनेव। तदनुमाने तस्य व्यभिचारवारकत्वमेवेति वाच्यं। यत्राव्यभिचारकमतिव्याप्तिवारकं च विशेषणं पाकजनस ७१

योऽपचारेण लक्षणे। तत्रान्यतरविशेषणावैयर्थ्यापत्तेरितिचेन्न। उक्तानुमानस्याहार्यपक्षकानुमाने इतरभेदं पृथिवीत्व
समनियतभेदप्रतियोगितावच्छेदकं पाकजरसयोगपद्याभावसमनियतधर्मत्वादितितात्पर्यात्। अत्र चोभयोरपि व्याप्तिवा
रवारकत्वादिति। तच्चिन्त्यं। एवं हि पृथिवीत्वमितरभिन्नसमनियतं। पाकजरसयोगपद्यसमनियतत्वादित्यव्यग्रभीतये
चोपपत्तौ तदनुसरणप्रयासगौरवात्। अत्राप्युभयोर्व्यभिचारवारकत्वादिति। द्वितीयकल्पे विशिष्टाभावप्रतियोगिवि
शेषणतयैव न वैयर्थ्यमिति तत्संभवत्यपि। अधिकं तु प्रत्यक्षप्रकाशे विपंचितं। साद्यादिति। अत एव विषयग्रहणेनेव
च्छुरणकादृय इत्याग्रिमग्रंथः संगच्छत इति भावः। वायवीयेति। तथा च साक्रियमाणत्वविवक्षायामपि न दोषः। इच्छुरणक
देऽपि विषयत्वं गौणमेवेति भावः। तदीयेति। अत्र करचरणादिमदिति विशेषणं। तेन कम्पादिशरीरेणानार्थान्तरं। तद
यतिदृष्टान्तार्थं। पार्थिवत्वस्यैवासिसाधयिषितत्वेन जलीयापो निजशरीरेणार्थान्तरवारणाय पार्थिवपदं। अत्राप्रयोजक
त्वमागमरूपविपक्षबाधकानुसरणेन तत एव तत्सिद्धेर्वैयर्थ्यमिदं अनुमानमित्यस्वरसत्वं सूचयति। अपीति। नारकिणामि

72

कि·र तीति। एतच्चोपलक्षणं शरीराणीत्यध्याहरणीयं। चात्तेन क्षुद्रजंतूनां नारकिणां च यातनाशरीराणीति लभ्यत इति भावः।
७२ ननु भोक्त्रधिष्ठानं यदि तत्संयोगमात्रं तदाऽस्मदादिनैवासिद्धसाधनं। यदि च भोगजनकमनःसंयोगवत्वं तदा घत्तिनियते।
तिअर्थमित्यत आह। भोगेति। ज्ञानजनकमनःसंयोगवत्त्वमात्रं साध्यं अधिकस्य व्यर्थत्वात्। मूले भोक्त्रिति निरवयवशाङ्कोग
गर्भमन्नसाध्यमुद्देश्यमित्यन्ये। भोगत्वं जातिस्तां न वेयथेमित्यपरे। न चाद्यसाध्यमिंद्रियेपि गतमिति वाच्यं। व्यापक
व्यभिचारस्यादोषत्वात्। पयाश्वात्स्यात्मनिगतत्वात्। न चैवं वृक्षादीनां शरीरत्वासिद्धिरिंद्रियत्वबाधेन पक्षधर्मताबला
त्सिद्धेरिति भावः। न वाऽन्यभोगवत्त्वं तद्युक्ते वाऽसिद्धिवाच्यं। यथोक्तविशेषणविशेष्यभावे वैयर्थ्यभावात् तथैवोद्देश्यत्वात्।
अत एव मनःपदमपि। आत्मविशेषेति। न च सुषुप्तावव्याप्तिरिंद्रिये चातिव्याप्तिरिति वाच्यं। जीवनस्याऽत्राणस्य तेनप्रष्ठाग
साध्यव्याप्यहेतूपन्यासस्य तथापि निर्वाहादिति भावः। न चैवमप्यात्मपरं व्यर्थं। भोगाभावे साध्ये चक्षुरादौ व्यभिचारश्चेति चे रम·
न्न ज्ञानस्य विशेषगुणपदेनात्मनो गुणविशेषः स्मृतिरुक्ता। तेनोक्तदोषः। न चाद्यसाध्याविशेषः। ज्ञानत्वस्मृतित्वयोर्भेदा ७२

त्रासंदिग्धासिद्धिं च मूलएव निराकरिष्यति। अन्यथा यथाश्रुते ऽप्रतीकारात्॥ नचैवं मनःपदं व्यर्थं। प्राणमनोयोगश
रीरप्राणसंयोगेनान्यथासिद्धत्वात्। हेतुत्वेन प्राणो व्यभिचारवारकत्वात्॥ आत्मा हि साध्यस्त्वान्न व्यभिचार इति के
चित्॥ अन्ये तु जन्यात्मविशेषगुणत्वावच्छिन्नकार्यतानिरूपितयौगिककारणताश्रयमनःसंयोगवत्त्वं इत्यर्थः। तथा चा
त्मादिपदमप्रसिद्धिवारकतया न व्यर्थं न वा चक्षुरादौ व्यभिचार इत्याहुः। यद्वा तु जीवनलक्षणा जिज्ञासा तद्दाता दृश्म
नःसंयोगावच्छेदकत्वं तत्त्वोधं शरीरावच्छिन्नात्मनोयोगत्वेन हेतुत्वात्॥ अवच्छेदकत्वं चादृष्टविशेषविशिष्टत्वं। तत्का
रितं संबंधांतरं वा। अतएव सुषुप्तौ नाव्याप्तिः सत्यपि तदृष्टसत्त्वात्॥ अतएव मृतशरीरे नातिव्याप्तिः सदा तदभावात्॥
फलैकोन्नेयस्तस्य फलासत्त्वे ऽसत्त्वात्॥ यद्वा। जीवनयोनिजनजनकमनःसंयोगाश्रयत्वं जीवित्वं। न त्वात्माश्रयः। वि
कीर्षायोनियत्ने भिन्नयोनियत्नजनकत्वेन तद्व्यावृत्तजातिविशेषविशिष्टयत्नजनकत्वेन वा तदभिधानात्॥ सुषुप्त
वपि तज्जनकत्वमस्त्येवेत्यपि नाव्याप्तिः। जनकत्वं फलोपधानमिति न मृतशरीरातिव्याप्तिः। इदं च जीवनमात्मनोवि

73

कि॰म॰ ध्वंसं शरीरस्य सुषुप्तौ मनःसंयोगविरहस्यापि संभवेनाव्याप्त्यापत्तेरिति वदन्ति ज्ञानजनकेति। संयोगध्वंसमात्रं घटपटसंयोग
७३ ध्वंसे ऽतिव्याप्तमिति मनःपदं तथापि पंडमनःसंयोगध्वंसे ऽतिव्याप्तिरिति ज्ञानजनकेति जीवनदशायां तद्ध्वंसे ऽतिव्याप्ति
रितिजनकान्तं स्पंदविशेषणं। नच विभाजगन्येति व्यर्थं स्पंदस्य तद्जनकत्वेनासंभववारणार्थं त्वादिश्येको यथोक्त
विशेषणाविशेष्येभावे वैयर्थ्याभावादित्यथो नचैवमप्यत्यमनःपदं व्यर्थं। घटादौ तादृशावंड्डोऽसंयोगध्वंसे ऽतिव्याप्ति
वारकत्वादिति नचैवमप्यात्ममनःपदं व्यर्थं यत्नं घत्पश्चात्य एहसंयोगजनकात्सुशरीरस्पंदस्माज्जायविभागो जातस्तेन च मरणा
त्मकतादृशसंयोगध्वंसो जनितस्तत्रातिव्याप्तिवारकत्वादिति। मरणकालीनस्पंदेनापि दिगादिना संमनसःसंयोगजनन
दत्यातिवारणाय प्रथमं ज्ञानजनकपदं। न तु द्वितीयं ज्ञानजनकपदं स्वरूपयोग्यपरं फलोपधानपरं वा। नाद्यः शरी
रमनःसंयोगत्वेन स्वरूपयोग्यतायोग्यतायाः पंडमनःसंयोगेपि सत्त्वात् तद्ध्वंसमादाय जीवनदशायामतिव्याप्तेः। नांत्यः रम॰
अजनितज्ञानजनितचरमपंडमनःसंयोगध्वंसे मरणारूपेऽव्याप्तिरिति चेत्। पंडस्य स्वविषयसाक्षात्कारजनकत्वनिय ७३

मेनफलोपधानस्यसत्त्वात्।ज्ञानपदंविशेषगुणपरमित्यन्वयो।ननुचक्षुरादावतिव्याप्तिरितिचेत्।न।अन्त्यज्ञानजनकपद
स्यजन्यात्मविशेषगुणत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयपरत्वात्।एवंचद्वितीयक्षणेपदंज्ञाननिष्ठसंयोग
ध्वंसेतिव्याप्तिवारणायबोध्यं।ननुप्रथमज्ञानजनकपदंफलोपधानपरंस्वरूपयोग्यतापरंवा।नाद्यः।सुषुप्तिदशायां
कदाचिदुत्पन्नापिज्ञानदशायांचातिव्याप्तेः।नान्त्यः।आत्ममनोयोगत्वेनैवतद्योग्यतयामरणकालीनसंयोगस्यापि
तादृशसंयोगजनकत्वेनाव्याप्त्यापत्तेरितिचेत्।न।प्रथमज्ञानपदस्यविशेषगुणपरतयासुषुप्त्यादेर्जीवन
योनियत्नादिजनकत्वेनफलोपधानस्सत्वात्।ननुपरकायप्रवेशकालेस्वशरीरेतादृशध्वंसत्वाभावमरणंस्यात्।नच
तत्रातत्त्वस्तत्त्वव्यवहारादिष्टापत्तिः।पुनःस्वशरीरप्रवेशानन्तरंमृतपिनष्टापत्तेः।तद्ध्वंसस्यतत्रापिसत्त्वादितिचेत्।न
नुजन्मान्तरानुवर्तमानतादृशसंयोगध्वंसमादायजीवतोपिमृतत्वव्यवहारापत्तेरितिचेत्।न।जीवच्छरीरेतस्सत्वादेतत्त
नापत्तेः।ध्वंसस्यप्रतियोगिसमानदेशत्वनियमात्।नचात्मनिष्ठतादृशसंयोगध्वंसेतिव्याप्तिरितिवाच्यं।तस्यापिलक्ष्य

74

कि॰म॰ ७४ त्वात्। अत एव माद्दायात्मन्यपिष्टतव्यवहारः। इत्यत्रावस्थात्मनिष्ठत्वेनोक्ता वा ज्ञ ई मन्निर्लेश्च याह्य। नचैवमात्मनिज्ञस्मांत
रात्र वर्त्तमानध्वंसमादाय जीवद्दशायामिष्टतव्यवहारोऽस्त्विति वाच्यं। यत्र शरीरमाध्यक्षज्ञानजनकमनः संयोगध्वंसो यत्रात्मनि
तद्धशरावच्छेदेन तत्सद्व्यवहारहेतुत्वात्। मनो विशेषितः संयोगध्वंसो विवक्षितो मनसि च खोपलक्षित इति न तत्रातिप्र
संगः। न च शरीरनाशजन्योमरणः व्याप्तिश्च तत्र तादृशध्वंसस्य शरीरावच्छिन्नत्वेतिचेत्। तत्र शरीरेष्टतव्यवहाराभावेनत द
सत्वेप्यदोषात्। आत्मनि तु तद्व्यवहारस्तत्र च तत्सत्वमस्त्येव। नन्वस्तु मृत शरीरे हस्ताद्यवयवविगमाद्यत्र खंडशरीरमुत्प
न्नं तत्र ष्टतव्यवहारो न स्यात्। तादृशध्वंसस्य तत्राच्छिन्नो (?) इति चेत्। न। तत्र मृतत्वव्यवहारस्य गौणत्वादित्याहुः। तत्र तद्वृत्ति
रनन्यगत्या (गौ) कियज्ज एवेत्यप्याहुः। नच शरीरमनो योगे सत्येव यत्र प्राणोत्क्रमणं तन्मरणं तद्व्याप्तिरिति वाच्यं। ज्ञ
न्यात्मविशेषगुणोपधानविशिष्टमनोयोगभावस्य विवक्षितत्वात्। विशेषणाभावाधीनविशिष्टाभावस्य तत्रापि स राम॰
त्वादिति यत्त्विति। तादृशविशिष्टाभावे विभागजन्यत्वानन्वयात्। ध्वंसस्येव विभागजन्यत्वात्। वस्तुतः शरीरमनोयोग ७४

सत्येवतत्रमरणमित्यत्रमनोनाभावाद्प्राणोत्क्रमणकालेपिस्पर्शवद्वेगवत्प्राणसंयोगादृष्टवदात्मसंयोगाद्वेगवैन
क्रियासंभवेनतज्जन्यविभागजन्यमनःसंयोगध्वंससंभवादितिदिक्। एतद्ध्वंससंसर्गान्मरणव्यवहारौपयिकेतद्द्व
लक्षणमित्यप्राणोपोक्तं। प्रकृतेप्रकृतसाध्यव्याप्यहेतूपन्यासेव्यर्थविशेषणत्वात्। तथाचज्ञानजनकमनःसंयोगध्वं
समात्रमेवलिंगंतयाबोध्यं। नचतत्रापिव्यर्थविशेष्यत्वंतादृशसंयोगस्यैवव्याप्यत्वादितिवाच्यं। यन्निष्ठापनिरूपितेति
न्यायाद्ध्वंसनिष्ठव्याप्तिग्रहस्यविशेषणंविनालाघवाद्विशिष्टेनग्रहान्नीलधूमवद्देहिकानिष्ठावच्छेदकद्वयोपस्थितावेवला
घवावताराच्चा। अत्रचेत्तिदंव्यवहारौपयिकमस्तुमित्यौपयिकंच। नचव्यर्थविशेषणात्ताखंडाभावेतस्यादोषत्वा
दित्याहुः। स्वप्नहेति। स्वप्नवहसंज्ञिकायानाडीतन्मनःसंयोगजन्यमित्यर्थस्तेननात्माश्रयः। त्वचितत्स्यात्ताकारेति
व्याप्तिवारणायमनःपदं। ध्वंसेतिव्याप्तिवारणायज्ञानपदं। अत्रस्वप्नवहेत्यफलत्वांनव्यात्तिकमित्याहुः। अत्र
पिव्यवहारौपयिकमिदंजन्यज्ञानमात्रमेवप्रकृतसाध्यव्याप्यतयालिंगत्वेनबोध्यं। यद्यपितदृष्टात्मधर्मइतिस्वरूप

कि० सिद्धिस्तथापि तदवच्छेदकत्वं लिंगं। अवच्छेद्यावच्छेदकाभावसंबंधेन तस्यापि तद्धर्मत्वाज्ज्ञानदोषः॥ तत्संयुक्तेति। अत्र संयोगपदं विं
७५ त्यं। नचात्र वृथाविशेषणत्वं विशिष्टलिंगत्वे जन्यज्ञानमात्रस्यैव तथात्वे पूर्वहेत्वभेदइतिचेत्। न। अत्र ज्ञानपदस्य धात्वर्थज्ञा
नविशेषगुणपरत्वादृष्टाज्ञानाभावदशायामन्याभिरेवं चात्मविशेषगुणावच्छेदकत्वमात्रं लिंगमितिनोक्त
दोषः॥ धर्मादीति। विषमधात्वधिकरणत्वमित्यर्थः॥ भेषजप्रयोगश्चिकित्सेत्यर्थः॥ सत्वेति। यद्यपि पूर्वोक्तसंबंधेन
तस्यापि तद्धर्मत्वमन्यथा पूर्ववत्राप्यगतेस्तथा च किं चेष्टोपलक्षणेन। नच स्नेहस्य ज्ञानजन्यत्वात् पूर्वहेत्वविशेषमाशंक्य तदुप
लक्षणमिति वाच्यं। सामान्यविशेषभेदादपि हेतुसंभवात्। तथापि चेष्टायाः प्रत्यक्षत्वेन तत्रसंदिग्धासिद्ध्युद्धारं सुगम
इत्यभिप्रायेण तथोक्तं। जीवनमरणादेः सुप्रसिद्धत्वाद्दृष्टाभिसंधिमादि साधयति। हस्ताद्यारीति। आदिपदं लनतादि
संग्रहाय। स्वशरीरत्व उक्तसंबंधेन बोध्यमतो न बाधः स्वावच्छेदकसंतानित्वं च साध्यं। समानेति। शरीरपदमन्त्यावयु राम०
विपरं प्राणोपमितारणाय। न च प्राणपदेनैव तद्व्युदासः। प्राणत्वं हि ज्ञानजनकप्राणसंयोगाश्रयत्वं तत्र प्राणेपि संयो ७५

स्यादिष्टत्वात्॥ एतेन पाणिपदव्यर्थं हस्तादेः शरीरत्वासिद्धेरिष्टत्वाद्धेतुशरीरवृत्तिजातित्वासिद्धिरिति दूषणमप्यपा
स्तं। घटत्वादेर्व्यभिचारवारणाय प्राणीति। जातिपदस्य त्वजागरणगर्भे स्वाच्छेदे व्यभिचाराभावेपि स्वप्नगर्भे साक्षात्स्वप्न
शून्यदेवादिशरीरविशेषवृत्तिजातौ व्यभिचारः स्यादिति समानकालीनेति। नचैवमपि देवत्वजात्वे व्यभिचारो देव
नामस्वप्नत्वादिति वाच्यं जलीयशरीरादेरपि देवत्वेन जलत्वादिना संकरेण तस्य जातित्वासिद्धेर्जातिपदेनैव
तन्निरासात्। नचैवं जलत्वादावेव व्यभिचारः स्वप्नस्वप्नादिमद्वृत्तित्वे बाधकाभावात्। नहि स्वर्गे सर्वे एव जलीयादि
देवाः स्वप्नरहिता इत्यत्र। वस्तुतोन्त्यावयवीत्यत्र मात्रपदं देयं। न त्वतो यादृशसंसर्गिद्व्यतयोन्त्यावयवित्वाभावा
देवनोक्तव्यभिचार इति वाच्यं जलीयशरीरादीनां सर्वथाऽव्यान्तराणारंभकत्वस्यानुपगमात्। अत एव प्रागुक्तेश
रीरादिवृत्त्येकजातौ लक्षणमपि तत्र संगच्छते। ननु स्वर्गिणामेकैकशरीरत्वाज्जातौ व्यभिचार इति चेत्। नानानास्वर्गि
शरीरादिवृत्त्येकजातौ मानाभावात्। चैत्रत्वादिवत्प्रत्येकशरीरवृत्तिजातौ च समानकालीनानेकवृत्तित्वाभावात्।

76

कि॰ प्र॰ ननु तथापि योगिगतादृष्टवशेन कायव्यूहस्मरणात्कालान्तरे वेंडिकायां बहुशरीरस्मरणाद्वंडिकान्तरेऽरुत्वाद्देवव्यभिचा
७६ र इति चेन्न। तत्राप्येकजातीयत्वे मानाभावात्। भावे वा तत्रापीन्द्रियेति विशेषणात्। एतेन योगिनो भोगार्थकायव्यूहस्मरण
न्नद्वृत्तिजातेर्व्यभिचार इति परास्तं। दृष्टेष्वतं चेति हृष्टश्रमं निवारयति। संतेति। प्राणत्व इति। वाय्वपयेषुनापि तत्संभवा
दिति भावः। तस्याधिकेति। द्वितीयागमस्येत्यर्थः। एतच्चोपलक्षणं। प्रथमागमस्यक्षातिपरत्वमित्यपि द्रष्टव्यं। पांचभौति
कत्वेपि पृथिव्याः कारणकत्वान्न प्रथमागमस्याप्युपपन्न इत्यत आह पृथिव्येकेति। समवाय इति। तथा च पांचभौतिकत्वमेव
ति भावः। ननु शरीरपरंपरारंभकद्व्यणुकत्वेन पक्षत्वमिति नोक्तदोष इत्यस्वरसेनाह। पक्षधर्मेति। ज्ञत्ववावच्छिन्नेत्यर्थः। ए
तच्च निर्गंधत्वे साध्ये पृथिवीत्वेन साध्याभावाभावे सत्तानुसमवायादिसाहित्यादिकस्यानारंभकत्वमित्यत आह गंधान्तरेति।
पार्थिवद्व्यणुकत्वमिति। सत्तादाव्यभिचारादाहस्तत्वं तं। पृथिवीपरमाणुद्व्यणुकद्व्यणुकमात्रवृत्तिधर्मे व्यभिचारवा राम॰
हस्याप्येत्यादि। अपाठे मात्रपदमिष्टापत्तिवारणाय। विजातीयावयवारब्धेपरेणानिर्गंधत्वात्स्फप्रगमात्। यद्यप्येवमगंधमर ७६

किम॰ वोक्तितसंयोगान्यतरत्वे व्यभिचारवारकत्वात्। लिंगासंगान्निमुह्दरंति। गंधादेरिति। अनेकेति। परमाणुगंधादेर्व्यभिचारादाह
ऽवयवीति। विजातीयाभ्यामिति। तथाचानुभवबलाद्द्रव्यरूपं विजातीयाभ्यामारब्धमिति भावः। पंचत्वा। सिद्धापत्तेरिति। तथाच
पांचभौतिकत्वबोधकागमस्य प्रमाणत्वे किंशरीरं तथात्वे मानाभावमिति भावः। क्लृप्तः पृथिवीत्वादेः परमाणुवृत्तित्वेन तद्गंधेत
द्रावरूपकतया संकरोऽवर्जनीयः। परमाणुवृत्तिजातेरुपादेयद्रव्यवृत्तित्वनियमात्। अत्राकाशस्यानिःस्पर्शत्वादिद्रवत्वाद्द्रव्य
नारंभकत्वेन पांचभौतिकत्वागमः कारणत्वमात्रपर एवाङ्गमात्रे चेति तत्त्वं। समवायिभिरिति। गंधसमवायिभिरित्यर्थः। तत्
था च गंधसमवायिभिरेव परमाणुभिरारब्धम् इति साध्यार्थः। तेन संयुक्तसमवायादिसंबंधेन गंधवताऽपि जलादिपरमाणु
भिन्नार्थांतरमिति भावः। न च घटादिपरमाणवनारब्धत्वात्व्यभिचारः। साक्षात्परंपरासाधारणारंभकत्वस्य विवक्षितत्वा
त्। वस्तुतो गंधसमवायिभिरेवारब्धत्वमित्येव साध्यमतो नो दोषः। हेतौ द्व्यणुकपरं कार्यपदमित्यन्ये। न चैवं विपक्षस्यापि प्रत्य राम॰
क्षप्राभावे रतो नाथ इत्यरुचेराह यद्वेति। तथाच पक्षधर्मतावच्छेदकस्यासिद्धत्वान्नोक्तदोषो यथा साध्यात्तदभावात्ः पक्षत्व

77

सम्भवित्यादिमूलोक्तापादनेऽपि परस्येष्टापत्तिस्यात्तथा च परस्य तत्तन निर्गंधत्वाभ्युपगमः॥ स्वारसिकः। तथापि यदीदानीमेव तथाभ्युपगम्ये
ष्टापादनं कुर्यात्तदा तं हारण्यायत्तादिति मंतव्यं। ननु पार्थिवाद्व्यणुकवृत्तिसंयोगद्वित्वादौ व्यभिचारः॥ न च गुणान्यत्वे सतीत्यपि
विशेषणं। द्व्यणुकत्वादौ तु न यद्व्यणुकान्यत्वं तद्वादौ च तथापि व्यभिचारादिति चेन्न। द्व्यणुकपदस्य पृथिवीसमवायि
कारणकपरतया पृथिवीसमवायिकारणकमात्रवृत्तित्वे सतीत्यर्थः॥ पृथिवीमात्रसमवायिकारणकमात्रवृत्तित्वं
नभ्युपगमेऽपि परस्य तद्वृत्तित्वाभ्युपगमात्। न चैवं दृष्टान्तालाभः॥ पार्थिवीजलद्व्यणुकसमवायिकारणकमात्रसंयोग
वृत्तितत्संयोगत्वादेस्तथात्वादिति वदंति। तत्र। तत्संयोगपार्थिवद्व्यणुकान्यतरत्वे व्यभिचारात्तदवस्थात्। वस्तुतो निर्गं
धमात्रवृत्तीत्यनंतरं वृत्तिपदं पूरणीयं। तेन निर्गंधमात्रवृत्तिवृत्तिस्यादित्यापादमतो नो व्यभिचारः॥ द्व्यणुकत्वादेर
पि निर्गंधमात्रवृत्तिजलद्व्यणुकादिवृत्तित्वात्। न चैवं सन्न्यादावपादस्वत्वेन व्यभिचाराभावात्सत्यं जवपदव्यर्थमिति वाच्यं
। पृथिजलद्व्यणुकोपादेयसंयोगवृत्तितत्संयोगत्वादौ व्यभिचारवारकत्वात्। न चैवमपि मात्रपदं व्यर्थं पार्थिवद्व्यणुकपृ

विकल्पास्तु मानमात्रोच्छेदापत्तिरिति नावकाशः । जलीयशरीरारंभकांशेऽबाधात् । सिद्धा इत्यत आह समानुषेति यदा मानुषस्यापि जलीयशरी
रं तदा एतन्मानुषेति बोध्यं । यद्यपि गंधवत्परमाणुत्वादिति हेतुविपक्षत्वेनोक्तव्यभिचारः तथापि पांचभौतिकत्ववादिनोपि
पार्थिवशरीरे जलोपादेये स्वोपगमात् नैष सिद्धसाधनमेवेति प्रकारांतरमाह । पार्थिवपरमाणु रिति पृथिवीत्वमिति । संयोगवद्वृ
त्तिरिदानीं साध्यो रूढ्यपदं । स्वरूपनिर्वचनपरं हेतौ जातिपदं चिंत्यं । नन्वपरेणापि शरीरे जलत्वपृथिवीत्वादेरभ्युपगमाज्जलादि
नित्ववत्ताया सिद्धं । न च संकरभिया तदनभ्युपगमः । चित्ररूपवज्जलादिविजातीयशरीराभ्युपगंतारं प्रत्यनुमानमिति नो
क्तदोष इति वाच्यं । एवं सिद्धसाधनमिति तापत्तेरिति चेन्न । अत्र ब्रूमः । जलसमवेतस्यावयविनो यत्र द्रव्यं समवायिकारणं त
द्वृत्तित्वनिषेधः साध्य इति नासिद्धसाधनं । तदभ्युपगंतारं प्रत्येवानुमानमिति नासिद्धिरिति । जलेतरवृत्तिद्रव्यत्वव्याप्यजाति
मत्वादिति हेत्वर्थ इति नासिद्धिरित्यन्ये । प्रत्यभिज्ञानादिति मूलं । ननु उक्ते परिमाणाल्पत्वादृष्टदेवदत्तशरीरमिति चेन्न । न तद्वा
ल्पेदावगाहनात् तदसिद्धेरित्याह । ननु संयुक्तसमवायेन तद्ग्रह इत्यत आह । तद्वृत्तित्वेति । साक्षात्संबंधेनबाधकाभावादिति

78

कि॰ज॰ भावा। गंधवत्वादिति। गंधयोग्यत्वादित्यर्थः तेन चित्रगंधानुपगमाद्विजातीयगंधवत्त्वावयवारब्धनिर्गंधशरीरेन भागासिद्धिः
।वस्तुतस्तद्व्यसेवपक्षत्वे। घ्राणादितीति। नचैवमप्यादिपदं व्यर्थं। रसाव्यंजकत्वादिनापि व्यभिचारवारणादित्यत्र रूपरियहेणैव
तरस्य चक्षुरर्थत्वात्। गंधोपलब्धीति। लौकिकगंधसाक्षात्कार इत्यर्थः॥ रसादीत्यत्रादिपदं स्पर्शाव्यंजकत्वसंग्रहाय। अन्यथा तद्घटि
तेसाध्यद्वयं। विशिष्टेप्यर्थविशेषणत्वात्। रूपाव्यंजकत्वघटितंच न साध्यं। दृष्टांतस्य साध्यवैकल्यापत्तेः। नचैवं चक्षुरर्थोतरं जातं
घ्राणस्य गंधसाक्षात्काराणुपपत्तिः मनबाधस्फुरणात्। नचैवं मनसार्थांतरवारणाय रसादीति व्यर्थं तदंतरजन्यस्फुरणदशायां तदभि
धानात्। सिद्धसाधनप्रसंगात्। गंधेन सिद्धसाधनवारणाय संयोगीति। नचैवमपि शरीरपदं व्यर्थं। उद्देश्यपदतीत्यर्थं तदुपादानात्। अ
तवकरणपदमपि। येन घ्राणेंद्रियाधारनासापुटेन सिद्धसाधनवारणाय शरीरपरं तस्य च तदवयवत्वेन तत्संयोगित्वमिति। तद्भिन्नत्वं
।तत्स्पर्शीयपरमाणूपलब्धिजनकत्वेनाद्यविशेषणानिरस्तत्वात्। नच रसे परकीयत्वं विशेषणं गौरवात्। तदन्येति। रसाद्यविषयकबहि राम॰
विषयकलौकिकसाक्षात्कारत्वादित्यर्थः। दृष्टांतेति। गोलकस्य शरीरसंयोगित्वाभावात्तदधिष्ठानस्यान्यस्याभावादित्यर्थः॥ गंध

कारस्यामिति। एतद्व्याख्यालोकेनार्थान्तरवारणं। यत्तु दीपमात्रं गोलकं वोध्यं तेन मार्जारादिनायनं हेडायमानतेजसा नार्थान्तरं य
त्तु तादृशतेजो घटसंयोगस्य सविषयकसाक्षात्कारकारणत्वेपि तत्स्य विषयसंस्कारत्वाभावात् घटसाक्षात्कारणत्वं नेति प्रथ
मघटपदेनैव तदर्थान्तरवारणं। न च तादृशतेजोगोलकसंयोगस्य घटसाक्षात्कारजनकत्वाद्द्व्यघटपदेनैव तद्वारणं। अंजनादेरि
वतस्य चक्षुःसंस्कारकतया गोलकहन्नेरेव तथात्वेनान्वयव्यतिरेकाभ्यां तथात्वादिति। तन्न। एवं सिद्धसाधनाभावेप्येतदनुम
नबलादेव तद्धेतुत्वसिद्धार्थान्तरस्यापरिहारात्। अन्यथा वात्यालोकेनार्थान्तरवारणाय पक्षविशेषणानुपपत्तेः। तस्य विषयसं
स्कारकतया गोलकालोकसंयोगस्य हेतुत्वादिति। स्मोतं मार्जारादिगोलकस्य पक्षबहिर्भाव एव युक्त इति। आकाशादिविनार्थान्तर
वारणाय तेजः पदं न तु तेजोवृत्तितादृशसंयोगाधिकरणमित्येवास्तु न च प्राप्यकारित्वेन धनाय तदुपादानमिति वाच्यं। प्रकृत
स्य दृष्टांतासिद्धिनिवारणाय तावतैव संभवे प्राप्यकारित्वसाधनाय तदुपादाने त्वागादिति चेत्। अत्र प्राप्यकारिता दृशकारणजन्य
त्वसाध्याभिप्रायेण दृष्टान्तासिद्धिरूपभयानामादाय दत्तेति तदभिप्रायेण इदमित्येके। प्रसंगात् तत्साधनमित्यन्ये। नन्वेवमपि द्वित्री। यंघ

कि॰व॰ टसाक्षात्कारकारणपदं व्यर्थं तेन विनापि शाब्दकारित्वसिद्धेरिति चेन्न। तथैवोद्देश्यत्वादित्याहुः॥ रूपवत्त्व इति। संनिकर्षे व्यभि-
चारवारणाय सत्यंतं। पटादौ व्यभिचारवारणाय घटपदं। न चांधकारोत्पन्नविनष्टोत्पन्नघटसाक्षात्कारे तेषु घटे व्यभिचारः॥ चक्षुष्ट्वेन विशे-
षणात्॥ कारणत्वं च फलोपधानमतो न दोषः तादृशस्थले। तदप्यसाधारणेन विवक्षितं। अतो न शरीरे व्यभिचारः॥ यद्वा रूपवत्त्वव्याप्यघ-
टसाक्षात्कारकारणतावच्छेदकत्वादित्यर्थः॥ तेन शरीरे न व्यभिचारः॥ तत्र तत्रावच्छेदकशरीरत्वस्य वायवीयशरीरेपि सत्त्वेनेरिति न चिं-
त्यं। एवमसिद्ध्यापत्तेः॥ तदवच्छेदकगोलकत्वस्य वायवीयगोलकेपि सत्त्वे॥ तेजःसंयोगस्य तेजस्यपि सत्त्वात् तत्र व्यभिचारः॥ न च रस्न-
विशेषे व्यभिचारः। तस्य घटसाक्षात्कारहेतुत्वात्। तत्समवायेपि चक्षुःसंयुक्तसमवायसत्त्वादिति। सत्यंतं मनसि व्यभिचारवारणाय। नानाहेतुसू-
चनाय घ्राणादिपदं। गंधादौ व्यभिचारादाह द्रव्यपदं। जलपरमाणौ व्यभिचारादाह व्यंजकेति। रसाव्यंजकत्वगर्भे हेतौ वायूपनीतजले शीतस्प-
र्शव्यंजके व्यभिचारादाह गंधेति। स्पर्शाव्यंजकत्वगर्भे च स्वेतरे व्यभिचारवारणाय तत्र च। न च तेजसशरीरस्य रसाद्युद्भटरसाव्यंजकत्वगर्भे राम॰
व्यभिचार इति वाच्यं। स्पर्शाव्यंजकत्वमात्रे तात्पर्यात्॥ रूपवत्त्वे रूपादिमत्त्वे रस्परसादेरित्यर्थः॥ मूलस्थवदष्टां ताः तत्रोधाद्वेवं तरसा ह।

द्रव्यत्वव्याप्यपदवैयर्थ्यापत्तेः। जलत्वेनैवेति। जलत्वघटितधर्मेणैवेत्यर्थः। महत्त्वस्येति। न च साधकेन व्यापकत्वपरिहारार्थी त्वात्रेदं वैयर्थ्य
मितिवाच्यं। व्याप्यस्य च व्यापकेपि वैयर्थ्यात्। तत्वेन व्यापकताग्रहादित्येको वक्तातोऽनुकूलतर्काभावान्न साध्यव्यापकताग्रह इति बोध्यं॥
घथोद्देश्यार्थेणाप्येवं द्व्यणुकस्य खंडयित्वाप्यसाधकत्वात्तु न रक्तो यमारंभस्तथापि दोषांतरदानायाणुनोक्तमित्याशयः। सिद्ध्यसत्वेति। न
रत्नेख्वाद्युपलंभान्यथानुपपत्त्या महावयविनि तथात्वे पि त्रसरेणौ तदभावात्साक्षात्परम्परया वारम्भकत्वमेव। क्षितिबाध्यं। निरुपधिस इत्यारत्न
थापि नियमादिति भावः। सोपीति। आरम्भारंभकपक्षोपीत्यर्थः। शरावइति। शरावविशेषइत्यर्थः। तथा च घोटशरावोदंचनादीनामिति पं
चमटीकागोवलीवर्दन्यायेनेति बोध्यं। अन्येन्तु तत्र योगाद्यंगमनशीलवक्षपरत्वमत्र रूढ्या शरावपरत्वमित्याहुः। घटोयदीति। परमाणुरू
पादिकं दृष्टांतः। द्व्यणुकेव्यभिचारादाहप्रत्यक्षेति। सत्तादौ व्यभिचारादाह द्रव्यपदं। साधनेति। आकाशादौ साध्याव्यापकत्वमपि बोध्यं। कृत्स्नो राम॰
ऽत्ति। परिमाणावत्तोरित्यर्थः। एकदेशयापि देयं। तेन एकत्वकपालेकालभेदेन घटयोर्वृत्तौ न विरोधः। न चैकतंतुकपटासमवायिकारण ७८
संयोगाश्रयांशुसमवेततया व्यभिचार इति वाच्यं। तदनंतुपगच्छमतेनोक्तत्वात्। एतदस्वरसादेवाच्यइत्युक्तमित्याशयः। पटनाश इति। यथा

80

यद्देति। घ्राणेव्यभिचारवारणाय असाधारणेति। ननु द्रव्यत्वव्याप्यपदं व्यर्थं न च जले व्यभिचारवारणाय तदिति वाच्यं। शीतलस्प-
र्शान्निष्ठायोगपजलसंबंधेपि नवशरावगंधानभिव्यक्तेर्योगपजलत्वोपाधेस्तत्रात्रदवच्छेदकतया जातिपदादेव तद्वारणात् न च गं-
धत्वमादाय गंधेव्यभिचारवारणाय तदिति वाच्यं। अतीन्द्रियगंधानभिव्यक्तेस्तत्रापि गंधविशेषत्वोपाधेरेव तत्त्वात्। द्वितीयव्याध-
पदस्य तथापि व्यर्थत्वाच्च। न च जातिपदं धर्ममात्रपरमतो जल एव व्यभिचारवारणाय तदिति वाच्यं। योगपजलत्वस्य द्रव्यत्वव्याप्यज-
लत्वव्याप्यतया तथापि व्यभिचारादिति चेदत्र जातिपदं धर्ममात्रपरमन्यथा कुक्कुटीघ्राणादिदृष्टान्तस्यापि साधनवैकल्यापत्तेः।
अयोगपत्तसंबंधेन तदनभिव्यक्तेस्तत्रापि योगपजादिघटितोपाधेरेव तदवच्छेदकत्वात् न च तद्वृत्तिजातेर्योगपसंस्थानमात्राव्यंग्यत्वमि-
ति वाच्यं। दधिवायादिवद्बाधकाभावेन पृथ्वीत्वादिवृत्तित्वात्। एवं च जल एव व्यभिचारवारणाय तत्र न चैवमपि दोषतादवस्थ्यं। द्रव्य-
त्वव्याप्यपदस्य द्रव्यत्वसाक्षाद्व्याप्यजातिपरत्वात्। घटितद्रव्यत्वव्याप्यपरत्वात् न चैत्तेजसादिशरीरनासापुटे व्यभिचारः तत्र द्विन्नेनापि वि-
शेषणात्। एतेन तादृशद्रव्यत्वव्याप्यजातिमत्त्वमेव हेतुर्जले योगपजलत्वस्योपाधिरवच्छेदकः कुक्कुटीघ्राणादौ च जातिस्तथेति निरस्तं।

चेत्कत्रैवनंतो। द्वित्वं उकादिना नापटसमवायित्वाभ्युपगंतव्योतिनोक्तानियम इति भावः। नाद्वित्वेति। तथाचाग्रिमपटस्य पूर्वपराग्रिमतंतुमात्रसमवे
ततयानारम्भारंभकत्वादेनवा नियमभंग इति भावः। द्वितंतुकेति। तथा च पूर्वपटस्यानाग्रिमपटसमवायिकारणत्वमिति भावः। तथा च पूर्वपट
पीति। तथा च नानापटस्यैकदा सत्वादेवनैकदेशसमवायित्वमिति भावः। अणुत्वामिति। अणुपरिमाणवृत्तिजाति। विशेष इत्यर्थः। परममह
त्व इत्युत्कर्षरूपजातौ व्यभिचारादाह साक्षादिति। साक्षाद्व्याप्यत्वजातेरेवेति जातिपदं परमाणावृत्ति। आरंभकत्वं समवायिकारणत्वमतो
स्कंधादौ व्यभिचारः। साध्ये द्रव्यपदस्य खंडाभावेनैव यथाश्रुतमित्याशयेनोक्तं हेतौ च द्रव्यपदं चेत्यो। अयंग्रंथ इति। यद्यप्येवं सावयवारब्ध इ
ति साध्ये सिद्धसाधनं स्यादारम्भारंभकत्वादिना तथाभ्युपगमात्तथापि तत्वादनिषेधाभिधायि वेद्यस्य परमाणुरपि त्रसरेणुरारम्भ
इति पूर्वपक्षोपसंहारव्याजेन तस्मादित्यादिना परिहृत इति मंतव्यं। साधनावच्छिन्नेति। एतद्द्वयमसाध्ये द्व्यणुकरूपादौ साध्याव्या
पकत्वादुक्तं। सत्प्रतिपक्षोत्थापकतामह तथा चेति। साध्ये द्रव्यपदमकिंचित्करं। द्रव्यारम्भकत्वे सतीत्यस्य समवायिकारणकत्वे स
तीत्यर्थः। यद्यप्यत्र द्व्यणुकादौ व्यभिचारस्तथापि विशेषदर्शनस्याप्रामाण्यात्तत्र सत्प्रतिपक्षत्वं। महत्त्वात्मकमिति। महदात्मक

8.1

का॰म॰ मित्यर्थः॥ कारणत्वमिति। समवायिकारणत्वमित्यर्थः॥ कार्येति। अंत्यावयविभिन्नकार्यद्रव्यत्वेनेत्यर्थः॥ नन्वेवं घटादेरवयवत्वेने
८१ वतद्धेतुतास्त्वतथा च कुतो द्व्यणुकसिद्धिरिति चेत् न। द्व्यणुकसाधनस्य प्रागेवोक्तत्वात्। तथा च द्व्यणुकपरमाणुभिरपि त्रस
रेणुरारभ्यतामिति पक्षे समाधानमिदं त्र्यावयवत्वेनैव तद्धेतुत्वे परमाणुभिर्द्व्यणुकं नारभ्यत इति तात्पर्यं॥ विशेषएवेति। विशेष
वच्छिन्नएवेत्यर्थः॥ व्यभिचारादिति। यद्यपि विशेषहेतुत्वस्योक्तत्वात्सामान्यतो व्यभिचारो न दोषस्तथापि महत्त्वमात्रे उगतं कारणं नस्यादसा
मथाभेदकल्पने गौरवं चेति भावः॥ अनियमात्वन्मपक्षेपि द्व्यणुकाभ्युपगमादाह द्व्यणुकेति। अद्यावयवइति। योगिज्ञानमादायव्यभिचारइ
ति। योगिज्ञानमादायव्यभिचारइत्यत उक्तं अस्मदादीति। सुखादौ व्यभिचारादाह बहिरिति। ननु तथापि सामान्यलक्षणादिजन्यज्ञानमा
दायव्यभिचारः। पृथिवीत्वादौ च व्यभिचार इति चेत् न। अस्मदादीत्यादिना लौकिकप्रतिनियतबहिरिंद्रियजन्यसाक्षात्कारविषयत्वस्यो
क्तत्वात्। यद्वा प्रतिनियतेति न देयं जातिमत्त्वे सतीति विशेषणात् अनित्यद्रव्यसमवायिकारणकाभावस्य साध्यत्वाद्वा पृथिवीत्वादौ व्यभि र॰म॰
चारो न चेति। बहिरिंद्रियप्रत्यक्षत्वावच्छिन्नसाध्यव्यापको यद्युपाधिरिति नात्माकाशादौ साध्याव्यापकत्वं अत एवाहस्पत्यक्षेति। व॰ ८१

हिरिंद्रियप्रत्यक्षेत्यर्थः॥ ॥पृथिवीत्वमिति॥ आत्मत्वादिभेदेनार्थांतरवारणाय यद्यत्यंतं जातिविशेषणं। सत्ताभेदेन तद्वारणा
य द्रव्यत्वव्याप्येति। घटत्वभेदेन तद्वारणाय साक्षादिति। तद्व्याप्यजातिव्याप्यत्वगर्भसाक्षाद्व्याप्यत्वं साक्षात्त्वपीति तद्भेदेन तद्वारणा
य जातौ। ननु द्रव्यत्वसाक्षाद्व्याप्यपदं द्रव्यविभाजकपरं तेनोक्तदोषइत्यतआह विपक्षइति। द्रव्यत्वसाक्षाद्व्याप्येत्यत्र साक्षात्त्वभे
दगर्भव्याप्यसूचनाय। नच सोपादेयद्व्यणुकवृत्तीति व्यर्थं। मनस्त्ववत्परमाणुवृत्तिजात्यार्थांतरापत्तेः। नचैवमपि परमाणुद्व्यणु
कोभयवृत्तिजातिमादाय दोषतादवस्थ्यं। द्व्यणुकपदस्य द्व्यणुकादिपरत्वात्। उपादेयत्वं च साक्षात्त्वपरंपरासाधारणं बोध्यं
।कार्याकार्येत्यत्र कार्यपदं संपातायातं। जलत्वव्येति। नच कारणताव्यवच्छेदकतया जातिः सिद्ध्यतीति न उभयत्रापि तावच्छेदकतयेतिवा
च्यं ततोपि हि न जातित्वसिद्धिः। किंतु अनुगतधर्ममात्रसिद्धौ बाधकाभावाच्च जातित्वं तच्च तत्त्वं तदिदमाह अनुगतधर्मसिद्धावि
ति। अनित्येति। नच परमाणौ तादृशसिद्धिः। द्रव्यारंभकपरमाणुत्वेन सोपादेयद्व्यणुकवृत्ति द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य तत्रापि
मानात् न चैवं तस्य योग्यतावच्छेदकरूपवत्त्वे योग्यतापत्तिः। इष्टापत्तेः। नित्यस्नेहस्य प्रतिबंधकतया सहकारिविरहेण तत्र तस्याउपप

82

कि॰भ॰ त्तेः॥ एतच्चनित्यस्ययोग्यस्यफलोपधाननियमइतिमतमनस्युपेत्योक्तं। अन्येत्ववच्छेदकत्वंनयोगपद्यपरिभाषापन्नेः॥ किंचसहकारिविरह
८२ प्रयुक्तेकार्याभाववत्वंतद्विशिष्टमवच्छेदकत्वंवानचतत्परमाणौनित्यस्यसहकार्यविरहभावेनजन्याभावात्। तथानुगतेषुद्वयंहमि
त्यनुगतधर्मरूपावच्छेदकापेक्षातस्यचानुगतधर्मस्यातिप्रसंगोवगतः॥ तत्सिद्धानंतरंजलत्वस्यपरमाणुवृत्तित्वाभावेनातिप्रसंगाव
गमात्। तथाचतदवच्छेदेनसहकारिविरहप्रयुक्तकार्याभावमगोवंत्यत्तदवगमान्नोन्तस्दोषइतिजलत्ववत्वेपिपरमाणुर्नयोगपइति
वदंतितच्चिंत्यं। अतिप्रसक्तस्यानवच्छेदकत्वाद्यांगतिप्रसक्तगर्भतनियतत्वावच्छेदकत्वमितितदवच्छेदकत्वेनागतस्यजलस्यतथात्व
तिपरमाणुवृत्तित्वाभावमानेधर्मिग्राहकमानबाधात्तैपे। अन्यथादंडत्वादावतिप्रसंगस्याप्यदोषत्वेतन्नहाथादिविशेषणानुपपत्तेः। उक्तं
त्यापरमाणावपिसहकारिविरहप्रयुक्तकार्याभावसंभवाच्च। नित्यस्नेहस्यप्रतिबंधकतयासर्वदासहकारिविरहात्तस्यगतत्वाद्रूप
वत्त्वमानत्वंपार्थिवरूपेपीत्यन्यथाभावचेष्टाकांतरेति। पर्थतयाकत्वलाघवमागमपहायजन्हणामाहरूपाकजेति। घत्यक्षमेवेति। अत्रे राम॰
वकारेणेतरव्यवच्छेदकाकिंतस्फुटलिंगद्योतकः॥ रसनेंद्रियस्यबाहिरिंद्रियत्वेनचव्यवस्थापकयुक्त्याएवचानुमानादपिरसवत्वसिद्धे ८२

रित्याह। तन्माधुर्यं चेति। न वैपरीत्यं केवलेपि जले मधुरिमोपलंभादि। न हि रसांतरापि सर्वं जातिसाधारणी दृष्टान्ति। संभवतीति भावः।
। ननु मिष्टकर्कटीफलेतद्भावात्कागतिरित्यत आह तदवयवइति। तत्संनिहितावयवइत्यर्थः। तथाप्यवयविनः किमायातमि
त्यत आह अवयवेति। यद्यपि तत्रावयवरूपस्यापि जातीयरसवत्वात्तुणाविरोधेनानारंभाद्वयविनस्तज्जातीयरसवत्वात्। अत एव हरी
तकीनीरसेवेति सिद्धांतः। तथा चोक्तव्याप्तौ व्यभिचारोपि तथाप्यवयवस्य जातीयरसस्यावयविष्वृत्तिवेनोपलंभादित्यत्र तात्पर्य
यद्वा एतदस्य रसाद्वैवाद्वयहेति। एतच्च वैद्यकादवसेयं। तथा चेति। अवयविनि पाकानभ्युपगमान्तत्रातिव्याप्तिवारणाय जातीयप
दं यद्यप्येवमपि दोषतादवस्थ्यं तथापि पाकजजातीयान्यरसवत्त्वमित्यर्थः। घटरूपादेरपि प्रत्येकं सर्वपृथिव्यव्यापकतया वि
रूद्धगंधानिर्गंधत्वयाव्यभिचाराद्वाह स्नेहोपदादिति। ज्ञानादौ नैमित्तिकद्रवत्वे च व्यभिचारवारणाय पृथिवीपदं विशेषपदं च। यद्य
पि मूलोक्तमनुमानपरत्वमपहाय तर्कपरत्वमयुक्तं तथापि ताद्दृशजातिमत्त्वाभावान्न पृथिवीविशेषगुणा इत्यनुमेयमेव तत्रापि
चानुकूलतर्कोपमितिमंतव्यां यद्भूति। तथा चोक्तातर्कादावप्रयोजकत्वमिति भावः। स्नेहात्वमिति। ज्ञानत्वे द्रवत्वे व्यभिचाराद्वाह पृथि

कि॰भ॰
८३

विशेषपदेति।तद्गंधत्वादौ व्यभिचारादाह जातिरिति।अन्यथा पृथिवीपदेनावयविपृथिवी वह्निर्ज्ञेतेति न पृथिवीपरमाणुगतपाकजगंधे व्यभि
तो व्यभिचार इत्याहुः॥आपाद्येगुणपदं स्यष्टार्थं।प्रथमशंकायां तर्कमाह यदि चेति।प्रकृते पृथिवी सामान्यगुण एव निषेधस्येवोद्देश्य
त्वात्तत्प्रकारकप्रतीत्यर्थं पृथिवीपदमन्यथा त्वधिकं।गंधत्वे व्यभिचारादाह सामान्येति।गुरुत्वे व्यभिचारादाह प्रत्यक्षेति।जातिविशेष
णं।गुरुत्वव्याप्यत्वं च साक्षात्त्वाद्व्याप्यत्वे संयोगनिष्ठ निविडत्वजातौ व्यभिचारवारणाय।ननु गंधपृथिवीसंयोगाद्यन्तरत्वे व्यभिचारादाह
जातिरिति।न च तादृशजातित्वं नष्टहनिचादोषप्रयोजकं किंतु रूपे हत्वान्यत्व विशेषितमित्याशंकां निराकरोति।न चेति।जातित्वस्येति।
निरुक्तजातित्वस्येवेत्यर्थः॥वस्तुतः संयह हेत्वंतया जले रूपे हस्पावरूपकत्वात्तेनैवोपपन्नो पृथिव्यामपि तत्कल्पनायां मानाभावो ध्वंसे २
गौरवं चेति भावः॥यद्वुभ्योति।घटध्वंसजन्ये घटरूपादिध्वंसे व्यभिचारादाह चरमेइत्यपदं।यद्वुध्मा भावजन्यमिति प्रकृते प्रतिबंधकद्रव्या ८३
त्यंताभावजन्ये द्रव्ये व्यभिचारस्यादिति ध्वंसपर्यंतं।न च तद्ध्वंसस्यापि तत्र जनकत्वाद्दोषतादवस्थ्यं।ध्वंसत्वेन जनकत्वस्याविवक्षितत्वा
दन्तवसाहाकारजन्यामिथ्याधीध्वंसस्य ध्वंसस्यत्वेन कार्यत्वाद्द्विप्रतिजनकतया तत्र व्यभिचारणाय प्रथम इत्यपदं।विस्तरस्त्वाकरे

जलिमकरंदेऽनुसंधेयः॥ द्रव्येऽपीति। परमाणुवृत्तिजातेस्तु उपादेयद्रव्यवृत्तित्वनियमादित्यर्थः॥ अतिप्रसक्तामिति। तैलस्य च पार्थि-
वांकुरादिवृत्तित्वेऽपि॥ स्नेहत्वेति। स्निग्धविशेषितं चेत्यर्थः॥ स्नेहाश्रयस्यैव तैलत्वात्। न च स्नेहस्य जलधर्मत्वात्। तैलस्य च पार्थिवत्वान्नैव-
मिति वाच्यं संयुक्तसमवायेन तत्र वृत्तित्वात्॥ अत एवाह बीजद्रव्येति। बीजस्यापि बीजप्रभवत्वात् स्निग्धत्वाच्चेत्यर्थः॥ बीजद्रव्येऽपीति क्वचित्पा-
ठस्तत्र तस्यापि तथात्वादतिप्रसक्तिस्तुल्यैव। स्नेहत्वेऽपीति। स्निग्धत्वेऽपीत्यर्थः॥ वस्तुतो नापि गंधरसविशेषव्यंग्यं तैलत्वजातेर्बाधका-
भावात्तत्रैव शक्त्याऽयोगरूढिः॥ उपाधिशक्यत्वे गौरवात्। अपि चेत्यादि च न जातित्वबाधकार्थमुपन्यस्तं किंतु तदन्यव्यंजकव्यवस्थित-
ये। नन्वेवमाचार्यमते भेदस्य न रूढिमात्राभ्युपगमात्। अर्थानुपपत्तेस्तत्र तत एवमाचार्यपादैरुक्तमेवमांत्रं च भाक्तं तदिदमाह सार्वपादावृत्ति
। न च शक्यावाधा कथं न क्वचिदिति वाच्यम्। एवं सति पंकजं कुमुदमित्यत्रापि हि लक्षणा न स्यात्। व्यक्तिवचनान्यायेन जनितान्वयबोधतया
निराकांक्षत्वात् स्वतंत्रोपस्थितये पुरोडाशकपालवल्लक्षणेति यदि तत्रापि तुल्यं द्वयोस्तु विशेषो यत्पंकजपदे योगो नातिप्रसक्तोऽत्र
तु रूढिरिति। एवं च धर्मिश्यामत्वे तैलपदाद्विशिष्टोपस्थितावेकदेशरूढ्यर्थमात्रादेवान्वय एकदेशबाधापत्त्या लक्षणा यत्पाचविशिष्ट

कि॰भ॰ सैव विधिनिषेधविषयत्वेतिबोध्यं। केचित्तु। उभयमतेपिप्रयोगिरूढिनाचायमितितैलत्वजात्या मिश्रमतेताहशोपाधिनेत्याहुः॥ जातिनियो
८४ ति। अप्सु चनजत्यावं पूर्वोक्तातिप्रसक्तेरितिभावः। यथेति। तेजःसंयोगासमवायिकारणकाद्रुतिर्वंतद्व्यद्रुतित्वं। अन्यथाद्रवत्वव्याप्य
पद्वैयर्थ्यापत्तेः। यद्यपिस्नेहस्यस्नेहत्वेनैवसाधारण्यंतथापितत्रसांसिद्धिकद्रवत्वविशेषणंमूलएवलक्ष्यनिर्वचनं। तत्संयोगेति
तेजःसंयोगेत्यर्थः। अविंधनेति। अस्मात्रेंधनत्वाद्दृन्तइतिभावः। तेनभौमस्यापितैलोपजंभकजलेइंधनतयानासिद्धिः। नचैवंगजोदर
वह्नावतिप्रसंगस्तस्यापिकाष्ठेंधनत्वात्। तदुक्तंनाहिगजानामुदयंतेजोशितंवटकाष्ठादिपचतीतिवाच्यं। तत्रहिकाष्ठस्यपचनीयत्वमात्रमु
क्तंनत्विंधनत्वमपीत्याहुः। दिव्येति। तैलसंसर्गिजलेचतादृशजलत्वसत्वान्नव्यभिचारः। सत्यंतमात्रमाकाशादौव्यभिचारीतिभौमेत्यादि
। नचभौमेतिव्यर्थं भौमानलत्वस्यजातिविशेषतयातदभावादितिकेचित्। भौमपदंभजमहात्मणत्वातधावसाम्यस्योदर्यवह्निदीपकतयात
त्र्यभिचारवारकत्वादित्यन्ये। नचदिव्यपदमसिद्धिवारकतयाव्यर्थं विशिष्टाभावेनदभावात्। असिद्धिवारकत्वाद्यथोक्तविवक्षातएव रत्न॰
यथाश्रुतहृर्णांकस्यापिसमाधानवायुक्तमित्याहुः। अतएवेति। भौमेतीति। भौमानलेतियर्थमित्यर्थः। अन्यथासमवेविधिसाम्यापत्तेरि ८४

तिवोध्यं। अतलन्नाशेति। स्वल्पंतं द्रिगाद्रावविशिष्टमनलजन्यअग्रतिवंधकमंत्रादावतिप्रसंगवारणाय। रसवत्त्वेति। चोवाकारार्थो। तथा
चोक्तशून्यत्वे सति रसवत्त्वादिति पर्यवसितो हेतुः॥ केचित्तु रसवत्त्वे सति भौमानलेंधनत्वादिति हेतुः॥ नचैतैलोपष्टंभकजले व्यभिचारः॥
तद्भिन्नानलेंधनं जलांतरेतथा। हेतुर्जनाश्रकिंवल्पवादनिर्वापकमात्रमित्याहुः॥ वस्तुतस्तस्य तथात्वेपि तदन्यत्वविशेषितमिदमेवलिं
गमुक्तशून्यत्वसाध्योन्याश्रयप्रसंगवारपार्थिवचानिश्चयेउक्तशून्यत्वानिश्चयप्रसक्तिश्चयेवपार्थिवत्वानिश्चया। तेनेत्स्यचनगजलत्व
पार्थिवत्वसंदेहादिति। शरीरारंभकेति। शरीरसमवायिकारणेत्यर्थः॥ गंधवदिति। गंधयोगपद्वृत्तिवमित्यर्थः॥ गंधवत्त्वमितिगंध
योगपत्त्वमित्यर्थः॥ निर्गंधेति। गंधायोगेपेत्यर्थः॥ यथाशरीरस्येति। पार्थिवस्येति शेषः॥ रूपादीति। नत्वादिपदंव्यर्थं। जलस्यतुमाद्र
रादिरूपव्यंजकतयाविशिष्यभावनिर्वाहकतया। सिद्धिवारकत्वेन साईर्थकत्वादित्याहुः॥ स्पर्शव्यंजकत्वघटितहेत्वंतरसूचन
पत्तदित्यने। रूपपदंत्वपरकीयरूपपरमन्यथामूलस्थदृष्टांतासिध्यापत्तेः। अतएवाशंकतेनचेति। अन्यथातस्यस्वीयरूपव्यंज
कतयाशंकाविरहात्। पार्थिवेति। नचतस्यापिस्वीयरसव्यंजकतयादोषतादवस्थ्यंपरकीयात्वयस्यापिरसविशेषणात्। अत
85

एवेति। नचेद्रव्यत्वविशेषणादेवेत्यर्थः॥ इंद्रियेति। इंद्रियत्वस्य संयोगाश्रयत्वघटिततया द्रव्यत्वसिद्धेरित्यर्थः॥ मोमेनेति। नचात्र द्रव्यां
तरमेव गौरवेणातद्कल्पनाच्च कल्पनेऽवयवांतरकल्पने गौरवात्समानोपादानकतया विलीनस्य जलत्वमावश्यकमिति भावः॥ त
थापीगौति। एवं च परमाणोरपि स्वरूपयोग्यत्वे यथा तत्र न तद्व्युत्पत्तिस्तथोक्तं जलग्रंथे॥ दृष्कृतत्वात्तेजः॥ पदर्शकयतावच्छेदकजात्य
नुगतधर्मासिद्धेर्बाधकाभावाच्च जातित्वमिति बोध्यं॥ अनभिभूतस्येवेति। अनभिभूतरूपस्येवेत्यर्थः॥ रूपेति। वह्न्यादेरिति शेषः॥ अ
न्यथा सुवर्णस्यापि परप्रकाशकत्वापत्तिरिति भावः॥ असिद्धेरिति। तथाविधमस्येति शेषः॥ नचैव सुवर्णातिप्रसंग इत्यत आह तेजस
इति। सुवर्णादेरित्यर्थः॥ संयोगस्येति। संयोगविशेषस्येत्यर्थः॥ अन्यथा सुवर्णसंयोगाद्वह्नेरप्यप्रकाशकत्वापत्तिरिति भावः॥ रू
पवत्वेति। रूपवत्त्वं चाप्युद्भूतत्वजात्याभिमतमपीत्यर्थः॥ रूपेति। वह्न्यादेरिति शेषः॥ तथाविधमस्येति शेषः॥ सुवर्णाद्भिन्नरूपवत्त्वमेवाभि
भूतमिति फलवत्ता कल्प्यत इति भावः॥ मणिप्रभायामुष्णस्पर्शविप्रतिपत्तिबीजं दर्शयति। मेत्राद्वेति। चक्षुरिति। न रसाधनाव
च्छिन्नसाध्यव्यापकं चभास्वररूपसमवायिकारणतावच्छेदकत्वेनैव तेजस्त्वसिद्धेर्विपक्षबाधकेन हेतोः॥ साध्यव्याप्यत्वेनोपाधेस्सह

व्यापकत्वादिति भावः । असंगादाह एवं चेति । नचेति । अनुद्भूतरूपतेजःसिद्धिरित्यर्थः ॥ रूपस्पर्शवन्मात्रवृत्तीति । एतद्रूपस्य विशेषणं नी
रूपादिवृत्तित्वपर्यवसानवारणाय । रूपस्पर्शान्यतरगर्भतया अनुमानद्वयेतात्पर्यं । तेनान्यतरानुद्भूतत्वमात्रेणानन्यथासिद्धिः । यद्यपि नू
नेस्पर्शानुद्भूतत्वमात्रमुक्तं तथापि तेजस्त्वेनोपादानादनुद्भूतस्पर्शरूपस्यानुमानमुक्तमिति तदभिप्रायेण तथोक्तं न च चक्षुरादेरनुद्भू
तरूपाद्यसिद्धिदशायां रूपादिवन्मात्रवृत्तित्वमसिद्धमिति वाच्यं । तस्योभयवादिसिद्धत्वात् । तेजस्त्वं यदि नीरूपवृत्ति द्रव्यत्वव्याप्यजा
तिः स्यात् रूपवद्वृत्तिर्न स्यादिति तात्सिद्धेः । नन्वनुद्भूतत्वेनानुपलंभ इत्युक्तं तदुद्भूतत्वं व्याप्यपक्षत्वपरतया साध्याविशेषादित्यत
आह अनुद्भूतत्वं चेति । रूपत्वादीति । अनुद्भूतत्वादिव्याप्यमित्यर्थः ॥ नानात्वेपीति । न्यूनाधिकसंख्यत्वेपीत्यर्थः ॥ उभयजात्यभ्युपगमे मानाभा
वात् । नचेति । नचादिपदग्राह्यरसाद्यव्यंजकतया विशिष्टाभावसत्वादिदमयुक्तमिति वाच्यं । आदिपदस्य प्रत्येकहेतुपरतया लघुकत्वात् । अ
न्यथा रसाव्यंजकत्वमात्रस्यैव सामर्थ्याधिकस्य व्यर्थत्वात् । अत एव तदेव हेतुविशेषणमाह रसेति । अत्रापि यद्घ्राणादिपदं तद्घ्राणगंधाव्यं
जकत्वलक्षणाहेतुत्वं तत्सूचनाय । नच गोलके व्यभिचारः । तस्य स्वरसादिव्यंजकत्वात् । यद्यप्येवमपि वायवीयशरीरगोलके व्यभिचारस्त

86

कि॰भ॰ याप्रितदन्यत्वे सतीत्यपि विशेषणं बोध्यं। प्रकाशकत्वं च प्रकाशाकरणत्वमतो न विषयतत्सन्निकर्षादौ व्यभिचारः॥ एवं च रूपव्यंज
८६ कत्वगर्भतयापि सामंजस्ये स्फटिकादीत्यादिना विशेष्यभागान्यथाकरणं कथमित्थमिति चिंत्यं केचित्तु रूपेत्यादिना पक्षतावच्छेद
कनिर्वचनं रसाव्यंजकरूपव्यंजकपरमत्वरूपं वाच्यमित्यन्यथा हेतूपादानं न च रूपसाक्षात्कारत्वावच्छिन्नकार्यतानिरूपितयोगिकौ कारणता
प्रयपरमेतादृशि वाच्यं असंभवाश्चाक्षुषत्वजातेरेव लाघवेन चक्षुर्जन्यतावच्छेदकत्वात् इत्यादिसाक्षात्कारसंग्राहकत्वाद्वा न च वृ
त्तित्वहेतोरपि तथात्वसंभवे कथं तत्परत्वमेवेति वाच्यं अस्याशोकवनिकादेशकल्पत्वात् न च चक्षुष्ट्वजातिः पक्षतावच्छेदिका
स्विति वाच्यं गोजक्रमेदासिद्धौ तदसिद्धेरित्याहुः॥ न चिंत्यं तत्समनियतस्याप्यनेकस्य तथात्वसंभवेन मूलहेतत्याग्रस्यासंभवादिति
कत्वात्। मनइति। तथा च सत्यंतेनैव तन्निरास इत्यर्थः॥ घटेति। एतच्च प्रागेव व्याख्यातप्रायं व्यभिचरितो व्यतिरेको विरुद्ध इत्याशयेनाह
विरुद्धत्वादित्यर्थ इति। सजातीयेति। यावद्विरुद्धत्वाभावसंवलनमित्यर्थः॥ अदृष्टविशेषेति। तदुक्तं। विशिष्टादृष्टवैशिष्ट्यात्तेजसं संवि राम॰
लोचनं व्यवधानादावभावश्चान्यरूपेणोपयुज्यत इति। पूर्वोक्तेति। कारणस्य कर्मजातस्यैव जनकत्वादित्यन्यथातिप्रसंगादिति तर्कोणज ८६

साधिकवत्वादितिभावः। उक्तस्येति। आहारपदस्य भोजनपरत्वे उक्तपरत्वे वा पौनरुक्त्यं स्यादिति भावः। यद्यप्युक्त एवाहार इत्या
दिमूलग्रंथे तद्व्याख्येयग्रंथांतरस्याभावादुक्तस्येत्यादिभाष्यव्याख्यानमनुपपन्नं। तथापि प्रसंगाद्दर्पवन्हेरेकपरिचायकभस्मा
धारणांकर्मांतरमुक्तमिति ध्येयं। उभयेति। न च हेतुपक्षतावच्छेदकाभेदः। विवादपदस्याधिकस्य पक्षतावच्छेदके प्रवेशादन्यथांशतः
सिद्धसाधनापत्तेरिति भावः। घटादेः साध्याव्याप्तेराह पक्षधर्मेति। पक्षधर्मो द्रव्यत्वादि यत्र। टपदं भक्तेति। एतच्च तत्र द्रव्यत्वपक्षे वोध्यं। ननु
तथादर्शनादित्ययुक्तं घटादौ तथैव दर्शनादित्यत आह अनुकूलेति। तथा च तथाव्याप्तेर्दर्शनादित्यर्थ इति भावः। वक्ष्यमाणत्वादि
ति। त्वयैव ग्रंथकारेणेति शेषः। एवं च वक्ष्याम इति मूलमपि ग्रंथकारवचनं मीमांसकवचनमध्येतेन तद्वचनादसंगतिः स्यादिति भा
वः। तथापीति। अनुच्छिद्यमानेत्युपलक्षणमपार्थिवत्वे साध्ये सत्यंतविशेषणे अच्छिद्यमानद्रव्यानधिकरणत्वस्य पूर्वहेतोरप्यदूषणा
त्यादिति वदंति। तन्न। घटादावनैकांत्यात्। नन्वेवमपि दीपादेः सकलसपक्षादित्यपि न ग्रंथविरोधः। जलपरमाणोः सपक्षाद्व्यावृत्तेरि
ति चेन्न अपार्थिवत्वस्य तेजस्त्वस्येव साध्यत्वेन विवक्षितत्वात्। एवं च जलपरमाणौ व्यभिचारवारणाय द्रव्यत्वविशेषणमनित्यत्वमपि वो

87

किं॰भ॰ ८७ ध्वं। जल परमाणुरूप्यतिरिक्तद्रव्ये त इति भावः। अत्रेनेति। सत्यंतविशेषणेनेत्यर्थः। दीपादेरिति। यद्यपि सत्यांति पक्षे सत्प्रतिपक्षांतरखंडसाध्य
गुणोपि न दोषस्तथाप्यसत्प्रतिपक्षोत्थापकतया दोषत्वात्तथापि संशयोत्थापकतया तस्य दोषत्वमिति मत्वा वष्टंभेनेदं पक्षएतद्द्रव्यस्य
देवी हा किंचेति। उपष्टंभक इति। एतच्च यथाश्रुतमभिप्रेत्य विवक्षित सत्यंतस्यैवतत्राभावात्। केचित्तु स्वर्णे एतेजस्पासिद्धेः विरोधिद्रव्यद्रव्यं
जलनिष्ठवाच्यं तथा सतीदमुक्तमिति भावः। व्यतिरेकिणामिति। साध्याभावगतसहचारः साध्याभावसहचारात्ति विरुद्ध इति मतो व्यभिचरितव्य
तिरेकिणां एव विरुद्धत्वादिति भावः। भजातीति। न पृथिवीत्वजातिनियतमित्यर्थः। न च तन्निपातत्वं तद्व्याप्यत्वमिति। घटे तद्व्यन्नावापिन दोष
इति वाच्यं स्वप्रयोजकतया तद्व्याप्रसिद्धेः। तदिदं वक्ष्यति। अदृष्टविशेषेति। स्वर्णाविहायेत्युपलक्षणं तथा ह्यतिघृतादरेजकतया परम
गोद्रव्यत्वं न स्यात् द्रव्यत्वसामान्याव्याप्यजातेरेवतत्र सत्वेन घृतत्वादेस्तत्र सत्वात् न चेष्टापत्तिः। अवयविद्रव्यत्वसामान्यावयवद्रव्यत्व
मात्रनियमात् अत एव घटाद्यनुगतं पार्थिवत्वव्याप्यमनुगतं नैमित्तिकद्रवत्वलक्षणकार्यकल्प्यं जात्यंतरमेवत द्रवद्वेदकमित्यपास्तं। नि रम॰
त्यित्यादि। तथा च नैमित्तिकद्रवत्वं न पार्थिवत्वतेजस्त्वनिष्ठापकं संशायकत्वात् किंतु पार्थिवं रूपादिमपार्थिवत्वनिष्ठापकमि ८०

त्यर्थः। सुवर्णमित्यादि। विरोधिद्रवद्रव्यासंयुक्तत्वे सतीत्यपि विशेषणमापादकेतिष्मो बोध्यं। एवं चायेपि विरोधिद्रवद्रव्यसंबद्धत्वस्यादि
तिपूरणीयं। पीतिमगुरुत्वेति। अत्र गुरुत्वपदमुपरंजकं। नत्वत्र विपर्ययापर्यवसानं। नहि यत्र तादृशरूपवत्वाभावस्तत्रात्यंतोष्मसं
योगिपार्थिवत्वे सति तादृशद्रवद्रव्यसंयुक्तत्वं आकाशादेर्व्यभिचारात्। मैवं। द्रवद्रव्यसंयुक्तं न स्यादित्यस्य द्रवद्रव्यासंयुक्तस्या
दित्यर्थात्। तथा च तादृशपार्थिवत्वे सति तादृशद्रवद्रव्यासंयुक्तत्वस्य व्यतिरेके पार्थिवत्वव्यतिरेकादप्याकाशादावसत्त्वेति
नोक्तदोषः प्रकृत इति। सांसिद्धिकद्रवत्वाद्यभावादित्यर्थः। असिद्धा चेति। न च तेजःसंयोगत्वेन जनकत्वाज्जनकतावच्छेद
कत्वेन च ज्ञानप्रतिबंधकत्वप्रकारकानुमितिविषयत्वं विरोधादिति वाच्यं। कारणत्वं हि न तेजःसंयोगत्वेनातिप्रसंगादित्युत्
कृतानभिभूततेजःसंयोगत्वेन वाच्यं। न चोपष्टंभकाभिभूते सुवर्णादितेजसि तदसत्त्वेति न काचिद्दोष इति भावः। प्रतिनियतेति।
न चोपष्टंभकस्यैव स्वरूपप्रतिबंधकस्वभावत्वं कल्प्यं धर्मिकल्पनातः इति न्यायादिति वाच्यं। पार्थिवत्वेन स्वरूपयोग्यतायाः प्र
तिबंधकत्वकल्पनाविरोधादिति भावः। अपार्थिवत्वेन तेजसत्वं विवक्षितं पार्थिवत्वाभाव एव वा आद्ये जलपरमाणाविति। अंत्ये

88

भ॰वु॰ ८८

पार्थिवेति। उक्तेतिनव्याप्तिरिहि सत्तापीति वाच्यं तद्द्रव्यभूमातिरिक्तानुविधापितयाभिमानकइव सैव रक्तसारतेत्याशयात्। छसत्ती
ति। वैशेषिकमते यद्द्रिष्टताघवेय विनिष्टस्येनाग्निसंयोगानाशप्तदा तत्र व्यभिचारवारणाय तद्द्रव्यत्वमपि विशेषणं बोध्यं। नचो
पष्टंभकइति। नचासतीत्यादिविशेषणादेव तन्निरासइति वाच्यं सुवर्णतेजस्यासिद्धिहृशायां व्यभिचारसंदेहस्यापरिहारात्। न
नुडुतत्तेजसत्वमेव साध्यं तथा च सपक्षाभावान्नासाधारण्यं बोध्यं। किंतु पनपक्षार्थमनुकूलतर्कानुसरणाच्चयासेतेत्याशयेनसा
ध्यसिध्यर्थं पीठमारभ्य पातिपद्भइति। हेतुसन्निहितं रूपवदिति यत्र विशेषणं। रूपवन्मात्रवृत्तीति तदर्थस्तेन नीरूपवृत्तितया नार्थांतरम
न्यथामनस्यादावपि साध्यसत्वे तद्वृत्त्यर्थापत्तेः। तत्पदं हेतौ कल्पितमत एव लीलावतीप्रकाशे तथैव पाठ इत्याहुः। घटत्वे व्यभिचारा
दाह साक्षादिति। घटसंयोगोकान्यतरत्वे व्यभिचारादाह जातीति। नन्वेति। नचमनस्यादौ साध्याव्याप्तिः। रूपवद्वृत्तित्वरूपपक्षधर्माव
छिन्नसाध्याव्यापकत्वात्। यद्यपि विरुद्धरसारब्धं द्रुतनीरसमादाय साध्याव्याप्ति विचित्ररसे भानाभावान्नयापित हृपि प्रमाणासाभावि राम॰
ति साध्याव्यापकत्वाय सामान्यत एव द्रुतनीरसं साधयति रसवत्त्वमिति। अत एव द्रुतनीरसवृत्त्यभावप्रतियोगित्वेनार्थांतरत्वात् [illegible] ८८

तद्वन्नीति। एतच्च उद्भूतत्वे व्यभिचारि उद्भूततेजःसिद्धिरित्यपास्तं। उद्भूतनीरसमात्रस्य धनस्यैवोद्देश्यत्वात्। नचैवं उद्भूततेजःसिद्धावित्यनेन विरोधः।
तेजःपदस्य नीरसपरत्वात्। तन्मात्रस्यैव प्रकृतोपयोगादेतदनुमानसाध्यत्वाच्च। अनुद्भूतवन्नीति। एतच्च उद्भूतत्वे व्यभिचारवारणार्थं। द्र
व्यत्वपदं रूपवत्त्वपरमतो न स्पर्शवत्त्वादौ व्यभिचारः। व्याप्यपदस्य न्यूनदेशं परतया रूपवत्त्वेन व्यभिचारः। नचैवमप्युद्भूतघटान्य
तरत्वेन व्यभिचारः। अभावाघटितत्वविशेषणोत्तद्भूतघटावितिसमूहालंबनविशेष्यत्वे व्यभिचार इति वाच्यं। इतरानिरूप्याघटितत्वे
सतीति विशेषणात्। नचैवमसिद्धिः। समवायिभिन्नत्वस्यापीतरानिरूप्यविशेषणत्वात्। वस्तुतो रसवत्त्वं द्रव्यत्वसमानाधिकरणात्य
ताभावप्रतियोगितावच्छेदकमुद्भूतवृत्तिवृत्तित्वरूपव्याप्यमात्रवृत्तिजातित्वादिति तात्पर्यं। विस्तरस्तु अस्मत्कृतप्रकाशे। सामान्यतो दृ
ष्टेन तेजस्सपक्षकेनोक्तोपाधिनिरासे तस्य निःकलंकत्वादिति भावः। अत्यंतेति। असति विरोधि द्रव्ये द्रव्यत्वं प्रसिं वध इत्यपि विशे
षणमतो न जलमध्यस्थघृते व्यभिचारः। अनित्यत्वं च द्रव्यत्वविशेषणं बोध्यं। द्रव्यत्वमिति। द्रवत्ववति द्रवत्वांतरानुत्पादादेकत्र च
तारतम्याभावादित्यर्थः। सुवर्णेति। यद्यपि जलसंयोगादिना तदुच्छेदेन तत्समाधानं। तथाप्यग्निसंयोगजन्यद्रवत्वोच्छेदसम

89

कि॰भ॰ येतत्समवधानमस्तीत्यर्थः। घृतेऽनैकांतस्पष्टस्य प्राक्काले द्रवत्वसामग्र्यभावान्नत्सूर्वं व्यधिकरणद्रवत्वसामग्र्यां सत्वेपि समानाधिकर
८५ णद्रवत्वसामग्र्यभावादिति भावः। एतच्छुक्लवर्णस्यामुना त्र्ययं घृतस्यात्राशयवचास्यपेत्योक्तं। शुक्लरोचिः समानाधिकरणद्रवत्वसा
मग्र्या पिठरपाकमते नोक्तेति ध्येयं। एवं चेति। न च तन्स्तूयं व्यर्थं घृते समानाधिकरणद्रवत्वसामग्र्यामनभ्युपगमेन व्यभिचाराभावादिति वाच्यं
अग्निसंयोगनाश्योऽप्यनैमित्तिकद्रवत्वमात्रनिष्ठजातिविशेषमादाय घृते व्यभिचारसंभवात् गुरुत्वादिकमादाय घटादौ व्यभिचार इत्याह।
द्रवत्वव्याप्येति। द्रवत्वव्याप्यजातिमद्रूपत्वमित्यर्थः। जलद्रवत्वस्याग्निसंयोगनाश्यत्वानभ्युपगमान्न तत्र व्यभिचारः। नैमित्तिकद्रवत्वे
त्वे व्याप्यत्वं विवक्षितमित्यन्ये। न च तस्य द्रवत्वमादायासिद्धिरिति वाच्यं। तत्र तादृशद्रवत्वसामग्र्यभावेपि चरमतन्नाशस्य जलादि
संबंधनिबंधनतया अग्निसंयोगनाश्यत्वेन विशिष्टहेतुसत्वात्। अधिकं घटत्वरूपकाशो तथापीति। भवत्स्पर्शवद्रूपमप्युद्भूतमेवास्तु।
रूपवत्स्पर्शोपि वाभिभूतोस्तु। न चैवं शुक्लवर्णस्पर्शात्तोषवानुपपत्तिः। स्पार्शनं वानुपपत्तेस्तत्स्यवात्। न च तदस्पार्शनमेव वचोपरिष्टं। रम॰
कमात्रस्येव यहादिति वाच्यं। चाक्षुषवेपि तत्यसत्वात्। तस्माद्धि निगमकमत्र चिंत्यं। उपष्टंभकेति। अभिभवः सजातीयसंवेद्यः। अ ८९

यंचतदाश्रयसंबंध इति भेदः। ननु प्रभारूपतेजोंतरकल्पने गौरवं मन्नाभावश्चैत्यरूपे हेरायेश्चेति। न चैवमप्रीतिः। यद्यप्यंधकारादृ
त्यादिनागतार्पित्त्वापि स्व्यातं त्रेणोक्तमिह त्वमूलानुसारेणेति विशेषाः॥ फलवलेनेति। तथा च तद्रूपस्याग्रहात् तदनुपलंभ इत्युक्त
त्वादिति भावः॥ ॥गंधादेकैकमूल्पत्वं गंधवदाद्येकैकनिमित्तत्वं। तेन गंधवदाद्येकैकनिरूपणं लभ्यते। अन्यथा गुणनिरूपणा
प्राप्तिरित्याहुः॥ ननु लक्षणमर्थएवेन दृश्यइति न तस्यार्थ इत्यत आह लक्षणस्येति। स्वसमानाधिकरणेति स्वं वै लक्षणघटकयाप्यमि
मतो धर्मः पृथिवीस्पर्शादिस्तत्समानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिः पृथिवीत्वं जलत्वं तत्वं भावनेश्वसिर्जलादिस्पर्शादिसद
वृत्तिरनेकजातिव्यापिका जातिरनुष्णाशीतस्पर्शविशेषवादिरेवं न चैवं जलादिस्पर्शादित्तमात्रवृत्तिजातिर्नानाजातिव्यापक
90
त्वाभावात्। न च तेजोरूपे उद्भूतत्वभास्वरत्वनानाजातिव्यापकत्वमादाय विशेषांतरस्यत्वापत्तिः। पाकजयोज्याया नानाजाते विविध
त्वात्। वक्ष्यते। पाकजत्वव्यापकत्वेनास्योक्तत्वात्। व्यापकव्यभिचारस्योक्तत्वात्। तत्र तत्सत्वेपि यथाश्रुतेन दोषः॥ अत एव सुखा
दावव्याप्तिव्यामिरपास्ता। न च वायुस्पर्शे उद्भूतत्वानुद्भूतत्वनानाजातिमादाय यथाश्रुतदोषसद्भावः वृत्तस्यैवानिर्वचनादिति वाच्यं।

म० ९० एकाभावेनैव्यपरान्यथासिद्धेरुभयजातित्वानभ्युपगमात्। अभ्युपगमे वानेकपदस्य वैरूप्यत्वाश्च तादृशजलत्वात्पंतभावत्वं पृथिव्याम
पीत्यसंभवइत्यत आह। स्वसमानाधिकरणेति। सन्नासाद्वाद्याप्यद्रव्यत्वमादायवायुस्पर्शेतिव्याप्तिवारणायद्रव्यवृत्तीति। द्रव्यत्वादिक
मादायासंभववारणाय साक्षादिति। गुणत्वादिकमादायवायुस्पर्शेतिव्याप्तिवारणाय प्रथमजातिपदं। अनेकजातिव्यापकसत्तासत्वात्
त्रैवातिव्याप्तिरित्यतउक्तं तन्नास्पर्शत्वा। अनेकधर्मव्यापकत्वमादायवायुस्पर्शेतिव्याप्तिरिति द्वितीयजातिपदं। वायुस्पर्शभिन्नान्यतरत्
त्वादिकमादायतत्रातिव्याप्तिरिति चरमजातिपदं। यद्वेति। उद्भूतत्वाख्यजातिव्यापकस्पर्शत्वव्याप्यजातिमत्वमित्यर्थः। भेदगर्भस
मानाधिकरणपस्पदिवद्भितवादित्यथाज्ञा। नचानुष्णाशीतत्वजातिमादायवायुस्पर्शेतिव्याप्तिरितिवाच्यं। पृथिवीवायुस्पर्शसा
धारणतज्जातेर्मानाभावात्। भावे वा स्पर्शत्वपदस्य तज्जातिपरत्वात्। पाकजेति॥ पाकजगुणत्वव्यापकमित्यर्थः। अन्यथा तेजो
वयविनि व्यभिचारात्। द्वितीयं च स्पर्शपाकजत्वव्यापकमिति मंतव्यं। नच जातिमत्वमात्रस्यैव पाकजगुणत्वव्यापकसंभवे विशेषणानां रम० ९०
तरवैयर्थ्यमितिवाच्यं। वायुस्पर्शव्यावृत्तजया विशिष्टोपादानात्। व्यापकेव्यर्थविशेषणतानेतिमतेनोक्तत्वात्। केचित्तु तथासति गुण

त्वमात्रस्यव्याप्यतयापाकजत्वविशेषणत्ववैयर्थ्यापत्त्याविशिष्टहेतौयेनविशेषणेनविनेतिन्यायात्साध्यविशेषणस्यसार्थकत्वा
द् ॥ अन्यथाविशिष्टधूमेनविशिष्टवह्न्यनुमानापत्तेरित्याहुः ॥ गुरुत्वेति । तावदजन्यत्वमत्रतावदसमवायिकारणकत्वाभावः ॥ अन्य
थाकर्ममात्रस्यादृष्टवदात्मसंयोगनिमित्तकारणकत्वादसिद्ध्यापत्तेः ॥ नचेति । तदसमवायिकारणकत्वाभावइत्यर्थः ॥ तज्ज
न्येति । तदसमवायिकारणकेत्यर्थः ॥ नीरूपत्वइति । शेषोपमातिरेकव्यञ्जकोनतुलक्षणप्रविष्टइतिबोध्यं । अतएवाह ।
अन्यथेति । यत्तुवैशेषिकमतेवयविनिपाकानभ्युपगमाद्घटादावतिव्याप्तेरजडक्तमितितन्न । एवमशीतेत्यादिवैयर्थ्या
पत्तेः ॥ तथाचपूर्वलक्षणाभेदापत्तेः । वायुः शरीरारंभकोद्रव्यारंभकत्वादितिव्यक्तिविशेषेव्यभिचारीअतआहवायुत्व
मिति । रूपादीति । आदिपदंहेत्वंतरसूचनायेतिबोध्यं । ननुयदिवायुस्स्पृश्यात्यइमंस्पर्शवान्द्रुषः सादीतिप्रतिकूलत
र्कइयप्रज्ञानेहरूपवत्त्वस्येति । रूपजनकत्वेति । प्रत्यक्षरूपजनकत्वेत्यर्थः ॥ यथेति । तथाचयथातोयतेजसोःस्पर्शवत्त्वंतथा ।
वायोरपीतिभावः ॥ वायुरिति । प्रत्यक्षस्पर्शाश्रयइतिशेषः । अन्यथामागवद्धासिद्धेः प्रसंगात् । मीमांसकैरिति । यत्

कि॰भ॰ ध्य्येवमप्यपिनैयायिकस्यासिद्धसाधनंभवत्येवतथापिस्वविशेषकप्रत्यक्षजनकत्वस्यभयसिद्धंसाध्यो।शेषःप्रत्यक्षप्रकाशो।नापीति
८१ ।आकाशातिप्रसंगवारणायजन्येति।जन्यशरीरादियात्यत्ववस्तुमध्यसिद्धं।भादायोक्तदोषादिंद्रियपदं।शब्दादेरुपनीतस्यचक्षुष
ग्रह्याद्दोषतादवस्थ्यादाहविशेषेति।ग्राह्यविशेषोग्रहः।विशेषविषयोलौकिकप्रत्यक्षविषयइतिभावः।तादृशग्राहकस्यघ्राणा
केसत्वादाहगुणोति।कार्येति।कार्यमहत्वयोरुपादानेन्यतरोपादानेचात्मातिप्रसंगइत्युभयोरुपादानं।कार्यमहत्ववत्वेतत्समाना
धिकरणगुणवत्वंवाचक्षुरादावतिप्रसक्तमितिविशेषणपदं।विशेषगुणोगुणविशेषउद्भूतइतियावत्।अतएवाहउद्भूतेति।नचेति।यत
चाक्षुषउद्भूतइतिमतेन।यदिचोद्भूतादेवोद्भूतमितिमतंतदान्तरेणस्पर्शोद्भूतइतियोगएवविवक्षितपरंनघटतेअन्यथात्वदास्वपद
देरुद्भूतस्पर्शव्यापन्नेरिति।उद्भूतेति।नचैवंचाक्षुषभासंख्यादिग्रहापत्तिः।विषमिसारिसरूपसजातीयसंवजनरूपदोषस्यप्रति
बंधकत्वात्।अन्यथात्वचापिसौरभासंख्यादिग्रहापत्तेस्तुल्यत्वादिति।एवमुद्भूतरूपवत्वमात्रस्यप्रयोजकत्वेदोषाभावादुभयप्र राम॰
योजकत्वेगौरवमितिअभिमतेस्वरसःसूचितइतिमन्तव्यं।अन्येदंचिन्त्यं।इत्थमप्रत्यक्षतायामिवरूपाप्रत्यक्षतायामपिवचनंहिउद्भूतप्र ८१

हतायकिमपिनेकंप्रयोजकमावश्यकं।वहिर्द्रव्यप्रत्यक्षत्वस्यतद्वद्देवकार्य्यतावच्छेदकत्वेमानाभावात्।अभावेवोद्भूतरूपएवत्वात्।दिवं
तथात्वउद्भूतत्वमेवलाघवात्।नचैवमतिप्रसंगः।विशेषसामग्रीसहितायाएवसामान्यसामग्र्याएवजनकत्वात्।चाक्षुषत्व
स्पार्शनत्वरूपविशेषद्वयसामग्रीचतत्रनास्त्येवेति।नचैवमुद्भूतत्वमपिन्याय्यं।तथासत्याकाशादेरपिस्वरूपयोग्यतयाकदाचि
त्प्रत्यक्षत्वप्रसंगापत्तेः।उद्भूतत्वस्यचमूर्त्तविशेषगुणमात्रवृत्तित्वात्।नचैवमपिपरमाण्वादावतिप्रसंगः।उद्भूतरूपवत्त्वे
पिमहत्वाभावात्।महत्वविशेषणेपितन्निवारणंतुल्यं।अन्यथोद्भूतरूपवत्त्वमप्यतिप्रसक्तंस्यात्।तप्तसितद्रुतेपिसुवर्णस्याप्रत्यक्ष
त्वात्।यद्विधस्वरूपग्रहसामग्रीरूपविशेषग्रहसामग्र्यभावात्तत्रतथात्वेतदातुल्यमिति।तथेति।अत्रापीदंचिंत्यं।अनुमानेविशे
92 षदर्शनमात्रस्यप्रतिबंधकत्वात्शीतस्पर्शेनवायवीयत्वानुमानासंभवात्।नचानुमानपदंज्ञानपरंतथाचचैतदत्तादितिवाच्यं।वा
युलिंगत्वरोपादित्यनेनविरोधात्।~~वह्निपीतःशंखइतिभ्रमकालेमानसो~~एवंचमानसारोपादित्यत्रयुक्तंमानसेपिविशेषदर्शनमा
त्रस्यप्रतिबंधकत्वात्।नहिपीतःशंखइतिभ्रमकालेमानसोपितथाप्रत्ययः।किंतुप्रत्यक्षात्मपएवेति।नहिदसुत्तंनहिःपीतःशंख

म॰ ८२

इति चाद्दिशेषदर्शनेपि शीतो वायुरिति प्रत्यय उपपद्यत इति। तद्व्यंजकेति। पृथिवीमात्रगुणव्यंजकस्य गंधव्यंजकत्वनियमादिति भाव
।नतु पृथिवीगुणमात्रव्यंजकत्वं तत्र तत्रेनचे हेतुः उद्भूतस्पर्शादिव्यंजकत्वादन्यथा घटादिरूपव्यंजकतया चक्षुषोपि तथात्वापत्तेरित्यरुचे
ह किंचेति। प्राङ्नाशवक्ष्यमाणतथात्वे तादृशस्पर्शवत्तया वायोरपि पार्थिवत्वं तथा पार्थिवेन्द्रियस्य गंधव्यंजकत्वापत्तिरित्यर्थः। एतच्चात्यागे इ
यस्य पार्थिवत्वे गंधव्यंजकतापत्तेरुक्तत्वादित्यपि स्फुटं। अन्येति। एतच्चन्यएकदेशिमते उद्भूतस्पर्शं इति मतेवोध्यं। ननु किंचेत्यत्र कोपत्वे व्याधि
करणमेव दोषः। नच धूमापूरितेनेत्यनेकोतिको इत्यादिवनेत्तत्र घटते तत्र तर्कोतिरिक्ताद्योदेति। नइत्यादिन धूमनमाहयदीति। तदिदं वह्न्या
ति। अत्र शंकत इति। ननु धूमव्याप्तिजत्वं इत्यस्य धूमत्वेनानामिति तेनानैकांतिकमित्यत आह धूमस्येपीति। अत एव धूमत्वमत्रं धूमेत्तत्याप
तद्भिन्नधूमव्यक्तिविशेषे व्यभिचारतादवस्थ्यमेवेत्यर्थः। नचेति। धूमारम्भत्वमसिद्धमित्यर्थः। अन्वयेति। यद्यप्यवयवानां हि सत्वेपि दृश्ये
